


UNIVERSITY

0-2409




001403

श्री

# जार्जचक्रवर्ति

# मकुटाभिषेकम्

नाम

# नाटकम्

Kumarasvami Sailam
MOUNT JOY,
Basavangudi
BANGALORE.

---

चेन्नपुरीपच्चयप्पपाटशालायां संस्कृताध्यापकप्राथम्यभाजा

श्वेतारण्यनारायणदीक्षितेन विरचितम्

---

चेन्नपुर्यां ओरियण्टल् मुद्रायन्त्रे मुद्रितं विजयतेतराम्

1912

# INTRODUCTION.

The gracious visit of Their Imperial Majesties, King-Emperor George V and Queen-Empress Mary III to this ancient land of sages to hold an Imperial Durbar at Delhi, the historic capital of India in order to make known in person to their loyal and faithful subjects in India the solemnity of their Coronation in England on 22nd June 1911, has given rise to many literary productions in many different languages. The present work is the first attempt by a purely orthodox Pandit to dramatise in Sanskrit the unique event of their Majesties' Imperial Coronation at Delhi which was celebrated with great pomp and circumstance on that never-to-be-forgotten day of 12th December 1911, over which the whole of India is still rejoicing and I am sure it will be a notable contribution to the Sanskrit Dramatic Literature that will cluster round this memorable event.

The author—Brahmasri Pandit Svetaranyam Narayana Sastrigal—comes of a well-known family of learned Brahmanas called Bahu-Kutumbins of the Gotra of Kausika, originally belonging to Kanchi Mandala, but latterly settled at Svetaranya (Tiruvengadu) on the bank of the river Kaveri in Tanjore District. His father, Anantanarayana Sastrigal was a learned Vedic scholar and his mother Parvati was a model Hindu woman. He studied at Kasi (Benares) for some years and learnt Sahitya and Vyakarana under the famous Pandits Balu Sastri and Visvanatha Sastri. He also made a special study of the Vedanta under several famous Sannyasins in that ancient centre of Hindu learning and was recognised as a great Sanskrit Pandit even before he attained his twentieth year. He is at present considered a master of the whole of Krishna Yajur Veda and portions of the Rig and Sama Vedas. In Sranta and Grishya Sutras, he is held as a great authority in these

parts, and it is only a few years ago that he performed th sacrifice of Soma Yaga at Tiruvottiyur therby evincing hi interest in the Vedic Literature and his regard for the rite prescribed therein.

This is not the first work of the author in the field of Sanskrit Literature, for he has already composed and published several works in Sanskrit, both original and explanatory and they have already secured for him a name to be considered as a great Sanskrit scholar and poet. His Sivarthalankara-Stava, with a special commentary of his own in Sanskrit—published in Grantha character along with a number of minor poems composed by him while he was young such as Devi-Kesadi-Padanta-Stuti, Sri-Jagad-guru-Sankaracharya-Stava, Sivakami-Stava and Chitsabhesa Stava—stamps him at once as one of our great Sanskrit poets and scholars. His Gadya-kavya (Part I)—which consists of seven stories, such as Harischandra-Charita, Kausiki-Charita, Urvasi-Pururavas-Charita, Sukumaravarma-Charita, Mahamoda-Charita, Jimutavahana-Charita and Lokokti-Sangraha—is an exquisite production in Sanskrit, written in a chaste and flowing style combining simplicity with elegance. The author has made a special study of the Sanskrit dramas and Sanskrit dramaturgy and he has written commentaries on several Natakas for the use of University-going students and his commentaries on Ratnavali, Janakiparinaya, Chandakausika and Parvatiparinaya are generally appreciated by the Sanskrit-knowing public. He has also written commentaries on portions of several other poems such as Buddha-Charita, Hamsa-Sandesa, Auchitya-Vichara-Charcha, Nala-Champu and Harsha-Charita and these are generally resorted to by the Examination-going students. Besides these works, he has also written a number of minor poems in Sanskrit, such as Kumara-Sataka, Nakshatra-Malika etc. He has been a Sanskrit Pandit at the Conjeeveram High School for several years, and he is now the Sanskrit Head Pandit of the Pachayappa's College.

The present drama is also written in an easy and simple style—a characteristic feature of all his works and the central idea of the play being their Imperial Majesties' Coronation in the historic city of Delhi, the author has rightly named the play "Makutabhisheka" or "The Coronation". The story of the drama accordingly begins with Their Majesties' gracious arrival at Bombay and ends with the imposing Coronation of Their Majesties in the presence of the great Imperial Darbar at Delhi, which is the grand end of the play. As the drama belongs to the class of Nataka among the ten major Rupakas, it contains all the five junctures, viz, Mukha (Protasis), Pratimukha (Epitasis) Garbha (Catastasis), Vimarsa (Peripateia) and Upasamhriti (Catastrophe), and the Nataka is accordingly divided into five Ankas or Acts, gradually developing through the five sources the five stages of action that go to bring about the grand end. Though the subject is too grand to form the plot of a small drama like this, it must be said to the very great credit of the author that he has succeeded in putting it into the shape of a Nataka and his deliniation of characters is on the whole very happy. Although the author does not know one letter of the English Alphabet, yet he has taken very great pains in studying the importance of the unique event of Their Majesties Coronation in India and is remarkably faithful to its main events which have been exciting the keen attention of all sorts of people in India. I have no doubt that the drama will he welcomed by all those who are interested in Sanskrit Literature, as one which eminently deserves their attention and patronage.

Sundara Mandiram,
Georgetown, Madras,
*2nd February*, 1912.

T. S. NARAYANA SASTRY,
B.A., B.L.,
*High Court Vakil, Madras.*

श्वैतारण्यविपश्चिन्नारायणयज्वनः कृतिर्जयति ।
मकुटाभिषेकनाटकमनितरसामान्यवस्तुसन्दब्धम् ॥

जार्ज्चक्रवर्ती महितोऽत्र नायको महोत्सवो यन्मकुटाभिषेचनम् ।
वाणीविलासैकनिकेतनङ्कविः किमत्र नाकर्षति यत्सुहृन्मनः ॥

इति चन्द्रशेखराख्यशास्त्रविदानन्दतुन्दिलस्वान्तः ।
श्रुत्वैतदात्मसम्मदममान्तमन्तस्तमामिहोज्जिरति ॥

This work "Makutabhishakam" A Sanskrit drama composed by Sree Swetaranyam Narayana Sastri Head Pandit Pacheyappa's College can be classed with one of the typical Sanskrit dramas. I am very much pleased with the style, matter and arrangement. So I recommend this as a text Book for the Intermediate Examination of the Madras University.

Mahamahopadhyaya
R. CHANDRASEKARA SASTRI,
*Principal*
MADRAS SANSKRIT COLLEGE,

## नाटकपात्राणि (*Dramatis Personæ.*)

चक्रवर्ती—The King-Emperor (George V.)

हिन्दियामन्त्री—The Secretary of state for India (Lord Crewe)

प्रातिनिधिः—The Viceroy (Lord Hardinge)

बम्बाभर्ता The Governor of Bombay(Sir GeorgeClerke)

मद्रभर्ता—The Governor of Madras(Lord Carmichael.)

विविक्तसचिवः—The Viceroy's Private Secretary.

रञ्जितसिंहः—Prince Ranjitsinghi, Jam of Navanagar.

मेटः—Sir Pherazeshah Mehta, President, Bombay Municipal Corporation.

मधुरानाथः
गोपीनाथः } Two Guzerattee Boys.

स्वदेशनृपाः—The Indian Princes.

समुन्नताधिकारिणः—Government High Officials.

प्रथमः पुरुषः
द्वितीयः पुरुषः } Two Post-men.

वन्दी—A Bard. शिष्यः—His Pupil. पुरोधसः—Bishops.

आङ्गलवैतालिकः—English Herald.

भारतवैतालिकः—Indian Herald.

चक्रवर्तिनी—The Queen-Empress (Mary III.)

बम्बाभर्तृभार्या—Lady Clarke, Wife of the Governor of Bombay.

मेटा—Lady Mehta, wife of Sir Pherozeshah Mehta.

आङ्गलयुवतयः—European Ladies.

**प्रघट्टकः** (Scene.)

Bombay and Delhi.

## Foreign names adapted into Sanskrit.

अतलान्तिक Atlantic.
अलक्सान्द्रा Alexandra.
अप्पालोबन्ध Apollo Bunder.
अकुबर Akbar.
अधिशासक Viceroy.
आङ्गल England.
आग्रा Agra.
आत्मीयसचिव Private Secretary.
आरञ्जभर्तृ Duke of Orange.
इलीजबात् Elizabeth.
उपशासक Lieutenant Governor.
ऊष्मानस्, ऊष्मशकट Railway.
एडन Aden.
कवचबन्धन Steeves.
कानटा Canada.
कोश्री Cochin.
चेलिङ्गर्स्थान Silingar Station.
जम्मामसूति Jumma Musjid.
जेतृविलिय — William Conqueror.
टेकूपति, टेकाधिपति — Duke of [illegible]ek.
तिंसा—Thames.
देवनस्वामिनी — Duchess of Devonshire.
दृश्यवस्तुसङ्ग्रह—Museum.
नैजां—Nizam.
नगरपालनाधिकारिन् — Police Officers.
पाञ्चाल—Punjab.
पूर्तगल—Portugal
प्राड्विवाक—Judge.
प्रसाधितशकट—Saloon.
पाश्चात्यमहामन्त्रालय Westminster Abbey.
बखिङ्गम—Buckingham.
बाष्पनौका—Steamer.
बाष्पयान—Railway.
मद्र—Madras.
महम्मद—Muhammadan.
महाजनप्रतिनिधि—Deputation.
मेडिना—Medina.
राजकीयप्रासाद— Government House.
रूपबिंब—Photograph.
लण्डन—London.
विविलय—Bible.
वङ्ग—Bengali
विक्टोरियाविरामस्थान—Victoria Terminus Station.
विविक्तसचिव—Private Secretary.
शासक—Governor.
षाप्टस्परिभर्त्तृ Duke or Duchess of Shaftesbury.
स्वनबिंब Gramophone.

श्री

जार्जचक्रवर्ति

# मकुटाभिषेकम्

## श्वेतारण्यनारायणयज्वरचितम्



शम्भुः पायात्स विष्णुद्रुहिणहरिहयप्रायमुख्यामरौघै-
स्सैनापत्याभिषेकं कलितमनुपमं देवसेनापतेर्यः ।
वीक्ष्य द्वेधा विभक्तं प्रमदमनुभवन्नप्यगाधीशपुत्र्या
सत्यम्मेने प्रतीतं श्रुतिमकुटगणैस्स्वाद्वयानन्दरूपम् ॥ १ ॥

(नान्द्यन्ते)

**सूत्रधारः—**

चान्द्री कला सममर्त्यपुरस्त्रवन्त्या
कामं विभूषयति यस्य किरीटकोटिम् ।
स्मृत्या सह श्रुतिरिव द्विजराजिमव्या-
त्सोमागणेशगुहनान्दिवृषस्स देवः ॥ २ ॥

(इति पुष्पाञ्जलिं विकीर्य । समन्तादवलोक्य ।) अये महाराजाधिराजस्य सामन्तसन्दोहमकुटमाणिनीराजितचरणराजीवस्यातला-

न्तिकसागरसंवेष्टिताङ्गलद्वीपदीपायमानतिंसानदीतीरविराजमानलण्डनमण्डनायमानस्य महिततमबखिङ्गमनामकुलराजधानीकुसुमशेखरस्य सकललोकसंरक्षणसमासक्ताया: परब्रह्मशक्तेरिव मूर्त्यन्तरमधिगताया: भारतचक्रवर्तिन्याश्रीविक्टोरियाया: कुलाङ्कुरस्य शमदमादिगुणगणवशीकृतसमस्तसामन्तचक्रस्य हिन्दुमण्डलीसम्राजश्रीमदेडवर्ड्महाराजस्य लावण्यविनिर्जितरमारतेरलक्सान्द्रायाश्च सुकृतप्ररोहस्य शारदज्योत्स्नासब्रह्मचारिशोभालहर्या: कमितुश्रीमेरिदेव्याश्शौर्यौदार्यगाम्भीर्यचातुर्यवाङ्माधुर्यविविधविद्यावैशारद्यनिर्व्याजकारुण्यप्रमुखप्रकृष्टगुणजातस्य तुर्यातीतस्य श्रीमतो जार्जचक्रवर्तिनो मकुटमहाभिषेकसमनन्तरमहोत्सवाय मद्रमण्डलमहासमाजमलङ्कुर्वते नानादिगन्तरादागतवन्तस्तत्रभवन्त: प्रभुवरा विद्वद्वराश्च रसिकधुरन्धरा: । (सम्यङ्निर्वर्ण्य । सानन्दम् )

सौवर्णो मुकुर: कलानटवधूवक्त्रश्रिया निर्मल:
शाणाश्मा विबुधाङ्गलागममहापाण्डित्यहेम्नस्तथा ।

केदारस्मुजनत्वनिष्कपटताशालिप्ररोहावले-
र्भाग्यानाम्मम रूपमन्यदसमं राजत्यसौ सत्सभा ॥ ३ ॥

सांप्रतमस्यां परिषदि कीदृशमभिनवं रूपकमभिनीय कुलधनमस्माकं यशोधनमर्जयिष्यामि । (नेपथ्याभिमुखमवलोक्य) मारिष इतस्तावत् ।

(प्रविश्य)

**पारिपार्श्विकः**—भाव अयमस्मि कः पुनरनुष्ठीयतान्नियोग-श्शारदकौमुद्युत्तराङ्गमहोत्सवाय संभ्रियमाणसम्भारेण मया पुनरनुपस्थितेन समाह्वानतः पूर्वमेव भावस्यापराद्धमानिना ।

**सूत्र**—( दिशः विलोक्य ) अये राजाधिराजश्रीमज्जार्जचक्रवर्तिमकुटाभिषेकसमनन्तरमहोत्सवसमुदितमद्रपुरमहाजनसभासमावर्जनप्रसितचेतसा नावबुध्यते स्म शरत्समयागमः । विजृम्भते किल शरत्समयलक्ष्मीराखिलजनहृदयङ्गमा । तथाहि—

सकाशमुमचामरा विमलसत्पथौज्वल्यदा
प्रसन्नसमवाहिनीविततसर्वदिङ्मण्डला ।
समोदभरमादृता सकलराजहंसैरियं
शरद्भराति भारताधिपतिचक्रवर्तिश्रियम् ॥ ४ ॥

**पारि**—भाव हेमन्तप्रारम्भेऽपि शरत्समयलक्ष्मीरात्मनीनरामणीयकमपरित्यजन्त्येव चक्रवर्तिमहोत्सवमखिलमालोकितुकामेव दृश्यते।

**सूत्र**—( सम्यङ्निरूप्य )—

शरत्समयसम्पत्तिस्समं हेमन्तसम्पदा ।
विराजति महोल्लासं प्रौढेव सह मुग्धया ॥ ५ ॥

मारिष परममभ्यर्हितत्वादलभ्ययोगकर्मणः पुनरमी शारदकौमुद्युत्तराङ्गोत्सवमपि विहाय जार्जचक्रवर्तिमकुटमहाभिषेकसमनन्तरमहनीयमहोत्सवमेवालभ्ययोगसदृशम्मन्यमानास्समुदितास्समनुतिष्ठन्ति सरससं-

विधानमनुपमसङ्गीतकसहृदयरञ्जकचक्रवर्तिप्रशंसाप्रासितमाहितसकलभा-षामयखण्डकाव्यमहोपन्यासादिभवुककुतुकम्। ममापि मध्येसभमखिलजनरञ्जकमश्रुतदृष्टचरमभिनेतुमभिनवं रूपकमदुश्च शासनम्। तत्कतमं पुनरभिनीय रूपकं परिषदि परिषद्भिर्निर्दिष्टमावर्जयिष्यामि सामाजिकमनांसि।

**पारि**—भाव भवतैवामूलचूडमवलोक्य समीपसमयएव सश्लाघं समर्पितम्मह्यं मया च सम्यक्पठितं सच्छात्रैश्च सह सपरितोषम्।

**सूत्र**—(स्मरणमभिनीय। सानन्दम्) मारिष संप्रत्येवातिसविधकाले कविवरेण श्रीमता श्वेतारण्यनारायणयज्वना ग्रथितमभिनवं जार्जचक्रवर्तिमकुटाभिषेकनाम नाटकमभिनयता समावर्जितान्येव सकलसभिकमनांसि।

**पारि**—भाव कविरसावधीती कासु विद्यासु कृतपूर्वी कांस्कान्प्रबन्धानासेविती च केषु मञ्चेषु।

**सूत्र**—असौ किल कविः—

अधीती श्रुत्यन्ते श्रुतिषु पदकल्पस्मृतिषु च
श्रुती न्याये वाक्ये पारिकलितपूर्वी बहुविधान्।

शिवार्थालङ्कारस्तवमुखमहाग्रन्थनिकरां-
स्तथैवेष्टी सोमे शमदमतितिक्षादिनिभृतः॥ ६॥

किञ्च—कवेरस्य कृतिमखिलामाकलितकलिविधूननादिकमनी-
यबहुनाकटः कवितिलकश्श्लाघते स्म श्रीमानेवं भट्टश्रीः।

'नारायणकविसूक्तं धारालरसं समीक्ष्य संसक्तम् ।
भट्टश्रीरनुरक्तं घट्टितवानत्र हृद्विवा नक्तम् ॥' इति ७ ॥

अपिच— अमुना कविना प्रहिताशिवार्थालङ्कारस्तवप्रभृतीः कृतीरनुवाच्य परितुष्टेन महामहिम्ना कलितानिर्लिपाङ्गलभाषाबहुग्रन्थेन श्रीवञ्चिराज्ञीवल्लभेन श्रीकेरलवर्मदेवेनापि प्राशस्यतैवं कविरयम् —

अलङ्काराढ्यत्वं स्फुरितभगवद्भक्तिरसता-
मितत्वं लालित्यं विशदविपुलार्थप्रवणता ।
इतीमे यौष्माके वचसि विलसन्तो गुणगणा-
गृणन्त्युच्चैः काव्यग्रथनपाटिमानं कमपि वः ॥ ८ ॥' इति ।

पारि—भाव कविरयं यदृच्छालब्धपरितुष्टः परिमितधनः कथमुरुद्रव्यसाध्यं सोमक्रतुमनुष्ठितवान् ।

सूत्र—अवितथमाह भवान् । कुबेरस्य स क्रतुरदृष्टवशादल्पधनिकधार्मिकधौरेययादृच्छिकसमवलम्बेन निर्वर्तितः । तथाहि—

सुब्रह्मण्यमहीसुरौ सुकृतिनावस्मिन्पुरे राजत-
स्तत्रैकस्सवसङ्गतद्विजगणानन्नेन तुष्टान्व्यधात् ।
अन्यस्तु क्रतुदक्षिणामदिशदप्यन्यैरमीभ्यामपि
प्रत्यूहेन विना ससोमसवनस्संपूरितस्स क्रतुः ॥ ९ ॥

पारि—भाव महाराजजार्जचक्रवर्तिनः परमविचित्रतरोष्मनौकायानाद्बंबानगरसमुद्रतीरावरोहणमारभ्य किं पुनः कथाप्रदेशं रचि-

तवान्। प्रागेषमस्तनजून्मासद्वाविंशादिवसे लण्डननगर्यां महाविभवपरिशोभिते पाश्चात्यमहामन्त्रालये श्रीमदाङ्गलमहाजनैरनुष्ठितं मकुटाभिषेकमहोत्सवमस्य प्रबन्धस्य मुखं कुतो न निबद्धवान्।

**सूत्र**—भाविनः परमाद्भुतस्य मकुटाभिषेकस्य पौनरुक्त्यं लण्डननगरादिन्दियामण्डलस्य बाष्पनौकागमनवशादनतिदवीयस्त्वेऽपि प्रत्यक्षतो दूराध्वप्रयाणवर्णनस्य संस्कृतकविसमयविरुद्धताञ्च मनसि निधायैव तथा कृतवानिति शङ्के (नेपथ्याभिमुखमवलोक्य) अये मद्भ्राता डिसम्बरद्वितीयदिवसे बम्बानगरमलङ्करिष्यतस्सपरिवारस्य मेरीनयनकैरवनिशाकरस्य श्रीमतो जार्जचक्रवर्तिनः प्रत्युद्गमादिमहोपचाराय डिल्लीनगराद्बम्बानगरमूष्मशकटयानेन प्रत्यासन्नस्य श्रीमतो महाराजप्रतिनिधेर्भूमिकां धृत्वा तदीयविविक्तसचिवभूमिकां धृतवता त्वद्भागिनेयेन सममितएवाभिवर्तते। तद्यावदावामप्यनन्तरकरणीयाय सज्जीभवावः॥

(इति निष्क्रान्तौ)

इति प्रस्तावना

(ततः प्रविशति राजप्रतिनिधिस्तदीयविविक्तसचिवश्च।)

**प्रतिनिधिः**—सचिव—

राजाधिराजभरतावनिचक्रवर्ति-
श्रीमेरिवल्लभमहामकुटाभिषेकम्।
द्रक्ष्यामि डिल्लिनगरे शुभसंविधान-
मित्येतदीयमनसः प्रमदोऽस्ति कोऽपि॥ १०॥

**सचिवः**—प्रभो न केवलमस्मादृशानामपितु सकलस्य भारत मण्डलस्य सन्तुष्टिरुदीरयितुं न पार्यते ।

**प्रति**—समस्तभूमण्डलभूषणायमाने महत्याङ्गलजनपदे नौकासहस्रसंशोभिततिंसानदीतीरविराजमाने लण्डनपुरे स्वाधिराज्यभद्रासनाधिरोहणप्रमयएव **विक्टोरिया**चक्रवर्तिन्यास्सत्कर्मपरिपाकेन सुगृहीतनाम्नस्सप्तमैडुर्ड्चक्रवर्तिनश्शमदमादिविवर्तेन लावण्यविनिर्जितसकलसुरवनितायाश्श्रीमदलक्सान्द्रामहाराज्ञ्या गर्भशुक्तिमुक्ताप्रकाण्डेन श्रिया इव रूपान्तरगताया श्श्रीमेरिमहादेव्या नयनेन्दीवरचन्द्रिरेण राज्ञा भृतानराष्ट्रस्य चक्रवर्तिना भारतमण्डल्यास्सत्यसन्धेन श्रीमन्महाराजाधिराजतुर्यातीत**जार्ज**चक्रवर्तिना पीयूषधारासारसरसा शासनपत्रिका प्रहिता ।

**सचि**—मयैव सम्यगुद्घाट्य वाचिता । यस्यां किल—"एकादशाधिकनवशतोत्तरसहस्रतमे हायने जून्मासस्य द्वाविंशतितमे दिने श्रीमति लण्डनपत्तने मकुटाभिषेकमहोत्सवो महानस्माकं महता विभवेन समनुष्ठितः प्रजाभिर्यथाङ्गलीभिरखिलाभिरामोदितस्तथैव सकलाभिर्भारतीयाभिः प्रजाभिरामोदनीयः पुनरवाङ्मनसगोचरविभवः पुरातनभारतसार्वभौमैरजातशत्रुप्रमुखैरधिष्ठितपूर्वायां भारतमण्डलीविशेषकमतल्लिकायां डिल्लीनगर्यामेकादशाधिकनवशतोत्तरसहस्रतमे वत्सरे डिसंबरमासि द्वादशे दिवसे निर्वर्तनीय इति महती स्पृहा समजनि । तद्भारतसाम्राज्यरक्षातन्त्रे निहितान् प्रतिमण्डलमधिकृतान् शासकोपशासकादी-

नस्मच्छासनमनुलङ्घ्यतस्स्वदेशमहाराजानन्यांश्च प्रभुवरान् समाहूय यथासंविधानमालोच्य नूतनपरिकर्मितायां कुतुकागतैरभिनन्दनीय-मण्डनमण्डितैस्तत्तदर्हबिरुदाङ्कितैर्भारतवास्तव्यैर्नृपप्रतिनिधिशासकोपशासकस्वदेशमहाराजप्रभुवरादिभिरलङ्कृतायां सुधर्मासन्निभायां सार्वभौम-सभायां श्रीमेरिदेव्या साकमारुह्य मणिमयसिंहासनं भारतसाम्राज्यभरण-धर्मसंरक्षणप्रतिज्ञाप्रख्यापनपुरस्सरं भारतीयैरखिलैरतिचिरात्प्रार्थितं किरीटाभिषेकमहोत्सवमनुभवितुमिच्छामः। वयमपि मेरिदेव्या टेकाधिपतिना देवनविभागस्वामिन्या प्रधानमन्त्रिभिर्मुख्यपरिवारैर्विविलयमतप्रवीणैराङ्गलपुरोधोभिश्च सममागामिनो नवम्बरमासस्यैकादशएव दिने समस्तसम्भारसम्भृताम्मेडिनासंज्ञाम्महाबाष्पीयनौकामारुह्य भारतमण्डलीं प्रस्थास्यामहे" इति सस्वनामुद्रमाज्ञापिता महान्तश्शुभोदन्ताः।

**प्रति**—यदा पुनराधिगता महती शासनपात्रिका विभो स्तदैव सर्वत्र भारतमण्डल्यां तन्त्रीद्वारा प्रख्यापितमिदं चक्रवर्तिनश्शासनम्।

**सचि**—प्रभो स्वदेशभूपतयः परमुत्सुकास्सन्ति तथाहि—

सर्वस्यां भारतोर्व्यां प्रबलबलयशस्स्थैर्यगाम्भीर्यधैर्या
नैजाम्मुख्या नृपालास्सपदि सरभसं स्वागतिं डिल्लिपुर्याः।
तन्त्रीद्वारा निवेद्य द्विशतपरिमिता स्संयुता रम्यचिह्नै-
रश्वैस्तुङ्गैर्द्विपेन्द्रैर्दिगधिपसदृशाः प्रस्थिता डिल्लिदेशम्॥ ११॥

डिल्ल्यामपि राजकीयशिबिरादिकमतिसुन्दरमारचितमेव—

श्रीडिल्ल्यां यमुनातटे निरुपमे क्षौमैर्विचित्रैः कृतं
श्रीराजार्हमतुल्यशिल्पिमणिभिश्श्रीकायमानं नवम् ।
दृष्ट्वा यत्किल मन्यते बुधजनैस्साक्षान्मयेनाथवा
त्वष्ट्रा सङ्गथिताऽलकाऽमरपुरी यन्त्रप्रभावागता ॥ १२ ॥

प्रति—

नृपाणां गेहानि प्रथितयशसामम्बरचयैः
कृतानीन्दुस्वच्छै र्मम मदनुगानामपि तथा ।
शिरस्येषां श्रीमान् लसति कलितो मण्टपमणि-
र्महाराजार्होऽयं हसति च रुचा शक्रनगरीम् ॥ १३ ॥

अपिच—

तन्मध्ये चन्द्रशालाध्वजपटकलशैस्सर्वहर्म्यातिशायि-
न्येका श्रीराजकीया परिलसति सभा राजसन्दर्शनार्था ।
या श्रीमद्धर्मसूनोर्मयमतिरचितां तां सभां त्वष्टृकृप्तां
माहेन्द्रीं तां सुधर्मामपिच परिहसत्यद्भुतार्थैरनेकैः ॥ १४ ॥

सचि—स्वदेशनृपा इव के पुनरन्ये समाहूताः कदा समाया-स्यन्ति ।

प्रति—समाहूताः प्रभूतवसुमतीस्वामिनो भारतीया वैदेशिकाश्च प्रतिमण्डलगताश्शासकोपशासकादयः प्रामाणिका राजकीयसभ्याः कुशाग्रमतयः प्राड्विवाकतल्लजाः प्रबलभुजबलाः प्रयुतपरिमिता भारताङ्गलपादाताः परस्सहस्ररथगजतुरगोष्ट्रसमन्वितास्सेनापतयोऽप्यनेके स-

न्निधास्यन्ति तस्मिन्नगरे समुद्दिष्टे तस्मिन्नवसरे । सांप्रतं वङ्गबंबापाञ्चालवन्मद्रमण्डलेऽपि प्रजास्तत्प्रधानभूस्वामिनश्च मकुटाभिषेकमिममायं किमामोदन्ते ।

**सचि**—प्रभो राजप्रतिनिधे मद्रमण्डलीतः पदेपदे तद्भर्तृसविधतस्समागतैस्तन्त्रीवृत्तान्तैर्मङ्गलपत्रैश्च तदीयप्रजानामामोदनसम्भ्रमः कथयितुमनलमास्माकीनजिह्वया । तथाप्येषामेवं संपिण्डितमर्थमावेदयामि ।

**प्रति**—व्यक्तमावेदय ।

**सचि**—आगामी दिव्यमकुटाभिषेकमहोत्सवदिवसः पारंपर्यानुष्ठीयमानरमागौरीशादिकुलदेवतावत्सरोत्सवपूर्वोत्तराङ्गोत्सववदासेतोराच हिमाचलादखिलैरपि भारतीयै राम्नायसरणिनिरतैरन्यैर्जैनबौद्धपारसिकमाहम्मदकैस्तवैश्च त्रिंशत्कोटीपरिमितैरामहीपालादाकृषीवलमापण्डितादापामरमाधनिकादादरिद्रमावृद्धादाबालमैकमत्येन प्रतिजनपदं प्रतिमण्डलं प्रतिनगरं प्रतिग्रामं स्वस्वशक्त्यानुगुण्येन समारभ्य बहुतिथादिनेभ्यस्समभिनन्द्यते ।

**प्रति**—कीदृश्यभिनन्दनरीतिः.

**सचि**—तत्रतत्र धनिककुटुम्बिनश्चित्रचित्रपत्रप्रसूननानारागचीनांबरकाकतादिरचितैरमणीयतोरणैरधिकसुरभिभिः कालागरुपाटीरधूपगन्धैरत्युज्जलैस्तैलघृतादिपरिमलितैर्वृक्षाकारैर्वैद्युतैश्च विचित्रप्रदीपविशेषैर्नूतनसुधाधवलितानि स्वस्वसदनानि समलङ्कुर्वन्ति । महितविभवेषु देवालयेषु चैत्यविपणिप्रतोलीषु च प्रतिघटिततोरणकिंकिणीरवामिषेण

चक्रवर्तिनोस्स्वागतमावेदयन्तीरिव तत्प्रतिरूपसमलंकृता ध्वजपटपताकाश्च समुच्छ्रयन्ति ।

**प्रति**—ततस्ततः ।

**सचि**—विपश्चितश्चीचक्रवर्तिमकुटाभिषेकविभवसूचकानि नानाभाषामयानि विचित्रकल्पनानि गद्यपद्यात्मकानि खण्डकाव्यानि सभासु वाचयन्ति । गायका मुरजमुरलीविपञ्चीकम्बुभेरीप्रमुखैर्वाद्यैस्सम्मिलितं मधुरतरं विस्पष्टमूर्छान्तरं निषादादिसप्तस्वरग्रामसंग्रथितं चक्रवर्तिकीर्तिप्रख्यापकं गेयं गायन्ति । लासिक्यश्च सुन्दरालङ्काराः प्रकाममङ्गोपाङ्गेष्वभिनयचातुरीं प्रकाशयन्त्यः कमनीयलयभूयिष्ठं पादं विन्यस्यन्त्यश्चेष्टाभिर्मान्मथीभिर्विभावानुभावान्प्रकटयन्त्यो रतिहासादिसमुद्भावनेन स्थायिभावान् संसूचयन्त्यः प्रभुगृहेषु नृत्यन्ति ।

**प्रति**—श्रवणानन्दना एव सर्वे समुदन्ताः। कथय तावदवशिष्टान् ।

**सचि**—मल्लाः परस्परं घातप्रतिघातारोहणावरोहणोत्पतनाधःपतनादिमल्लक्रीडामाचरन्ति । हासका विविधवेषभूषाभाषणचातुरीध्वननमाधुरीबाष्पयानादिनिनादानुकृतिप्रभृतिविनोदविधानैराबालगोपालं हासयन्ति । बालिका बालकाश्च स्वीयासु पाठशालासु पाठकैः पाठितानि मनोज्ञानि राजगीतान्युच्चैरतिकुतूहलेन वशीकुर्वन्ति ।

**प्रति**—ततस्ततः

सचि—मठाधिपतयो वणिक्पतयश्च स्वस्वौदार्यानुरूपमुच्चावचैर्भोज्यैरनुगुणैरम्बरैर्बहुभी रूपिकाभिर्दरिद्रान्धकाणमूकपङ्गुकुणिप्रभृतींश्च पुस्तकादिभिरुपबर्हणैर्बालकांश्च सम्भावयन्ति ।

किं बहुना—

देशेदेशे द्विजानां हृतदुरितशतैस्तुङ्गसन्मन्त्रघोषै-
रम्यैस्तूर्यस्वनैस्तैर्जयजयरुतिभिर्नालिकोच्चण्डनादैः ।
चित्रैर्बाणालिरावैः प्रमदकलकलैस्सर्वतो भारती भू-
र्नादब्रह्मात्मिकाऽऽस्ते नृपतिमणिकिरीटोत्सवामोदवित्ता ॥ १६ ॥

प्रति—वयस्य—

डिल्ल्यां राजार्हवासोगृहमणिरितरा राजकीया सभा च
स्वर्गौपम्या कृताऽन्या प्रभुवसतिततिश्चापि दृष्टा मयैव ।
तन्त्रीपत्त्रीमुखेन श्रुतिसरणिमिता भारतामोदवार्ता
दैवायत्ताऽऽयतिस्स्यादिति भवति मनाग्व्याकुलं मानसम्मे॥ १७॥

सचि—प्रभो महामहिमवतामाङ्गलवीरधौरेयाणां प्रवृत्तिमनुकूलदैवायातशुभायतिमेवावैमि । न पुनरत्र विशयकणिकामपि चिन्तयामि। दृश्यन्तां तावन्निदर्शनानि—

उप्तं पूर्वमिलीजबादभिधया राज्याऽप्यरूढञ्चिरं
स्थित्वाऽथाङ्कुरिताञ्चिरं सदपि तत्कालोल्लसत्पल्लवम् ।
सञ्जातप्रसवञ्चिरेण फलभाक्सार्धद्विशत्यब्दके
याते राज्यमहीजबीजमभवद्दैवानुकूल्येन नः ॥ १७ ॥

किञ्च—राज्ञी चास्माकमार्या **विक्टोरिया** सप्तत्रिंशदुत्तराष्ट-शताधिकसहस्रतमवत्सरे पैतामहमधिगम्य मकुटं खलनिकरपरिमुषितां भारतीं वसुमतीं तत्तादृशैरनितरसुलभैस्सामादिचतुर्विधोपायसमलंकृतैः परिपूर्णदैवप्रसादसंसाधितफलसमृद्धिभिस्सन्धिविग्रहादिगुणगणैस्संक्लृप्त-कण्टकशोधनामाकलय्य पुनरष्टपञ्चाशदुत्तराष्टशताधिकसहस्रतमे हायने नवम्बरमासप्रथमदिने पौरस्त्येन्दियावणिक्संघात्स्वयमेव निर्वोढुं प्राक्र-मतेति निजमण्डले सर्वत्र शासनपत्रिकाभावुक्तमादिशन्त्याः स्वस्याः समस्तस्य भारतमण्डलीवास्तव्यस्य च सुप्रसन्नदैवप्रसादविशेषा एव प्रख्यापिता इति विश्वजनीनम् । अपिच । सप्तसप्तत्यधिकाष्टशतो-त्तरसहस्रतमे वर्षे जनवरिमासि प्रथमदिवसे **श्रीविक्टोरियामहाराज्ञ्या** भारतचक्रवर्तिनीति कीर्तिचिह्नोपपदधारणमहोत्सवस्तथैव त्र्यधिकनवशतो त्तरसहस्रतमसंवत्सरजनवरिमासप्रथमदिने महिततमगुणनिधेः श्रीमद-लक्ष्मान्द्राभागधेयस्य सप्तमैडुर्ड् महाराजाधिराजस्य भारतचक्रवर्तिनः पट्टाभिषेकाभिनन्दनमहोत्सवश्च भारतसार्वभौमसमधिष्ठितचरे डिल्लिपुरे रमणीयबहुविधसंविधानपुरस्सरमारचिते राजार्हसभामण्डपे भारतशास-कोपशासकस्वदेशमहाराजप्रभुवरपरिमण्डिते प्रतिनिधिद्वारा निष्प्रत्यू-हलेशमभिनिर्वृत्त इति पौरुषकाञ्चनप्रसूनमास्माकीनं दैवानुकूल्यपरिम-लितमेवास्ते ।

**प्रति** — साधु वयस्य पौरुषमास्माकपूर्वपुरुषाणामभिनवासु कुशाग्रीयमतिदृष्टासु प्रवृत्तिष्वनुकूलदैवौन्मुख्यादनर्गलमेव । तथाहि—

यानान्यम्बुमहीवियत्सु बहुधा नेयानि चाप्यैर्महा-
न्त्यध्यर्धक्षणतस्समुद्धरधरणीवार्तां वहन्त्यस्तथा ।

तन्त्रचो वैद्युतदीपिकाः प्रतिफलद्रूपस्वनानां तथा
बिम्बास्सर्वमिदं हि धीविलसितं दैवानुकूल्यायति ॥ १८ ॥

वयस्यास्माकपौरुषबीजस्यासमयोप्तस्याप्यनभिसमेधितस्याप्यपल्लवितस्याप्यपुष्पितस्यापि चिरादपि फलमवश्यभाव्येव । किं पुनरनुगुणसमयोप्तस्य कालवृष्टिभिरभिवृद्धस्य पल्लवितस्य कुसुमितस्य । तथापि क्रोशषट्सहस्रीपरिमितप्रान्तरालुण्डनपुराद्वाप्वनौकायानेन महाराजचक्रवर्तिनो भातमण्डलीसमागमनमनन्तरायं कथं सेत्स्यतीति मध्येमध्ये तरलितचित्तोऽस्मि ।

**सचि**—प्रभो ह्यस्तनाद्बम्बाभर्तृसविधतस्समागतात्तन्त्रीवृत्तान्तादवगतमेव श्रीमच्चक्रवर्तिनस्सभार्याबन्धुमित्रपरिवारस्य पुनरक्लेशेनैव लण्डनतः प्रस्थायानुकूलपवमाननिष्प्रयत्नसमायातेन मेडिनानौकायानेन विश्रम्यविश्रम्य मध्येसराणि नगरमेडनाख्यमधिगतस्य मङ्गलारोग्यविजयवृत्तम् । किञ्च । बंबानगरीतश्श्रीमान्बंबाभर्ता चक्रवर्तिनमेडनस्थितं तन्त्रीद्वारा निवेदितवानिममुदन्तं " अहमत्रत्यास्सकलाधिकारिणः पत्तनप्रभुवरा धार्मिकधुरीणा भारतांगलाश्च श्रीमतस्तत्रभवतश्चक्रवर्तिनश्श्रीमदिदं बम्बानगरं पुरेव पञ्चषसंवत्सरेभ्यस्मांप्रतमपि दृष्टिपविस्रितमारचयितुमत्यन्तमुत्सुकास्स्मः" इति। ततश्चक्रवर्तिसन्निधितश्च प्रतितन्त्री बम्बाभर्तुः प्रहिता चैवं " भवतो भवदाशासनमहीमण्डलमण्डनायमानभारतप्रभुवराणाञ्च समुत्सुकतामाकर्ण्य परितुष्यामः आगामिनि डिसंबरद्वितीयादिने प्रातर्बंगानगरे विजयञ्चारचयिष्यामः" इति ।

प्रति— वयस्य निखिलाद्धारतमण्डलादितरेभ्यश्चान्तरीपेभ्यः पदेपदे समागच्छतां तन्त्रीवृत्तान्तानामसंख्येयतया डिल्लीनगर्यां मकुटाभिषेकमहासंविधानसततालोचनविहस्तमानसतया "अतिस्नेहः पापशङ्की" इति लोकोक्तिवशंवदतया च श्रीमति चक्रवर्तिन्यपि परमधैर्यगाम्भीर्यनिस्तुलमाधुर्यौदार्यनिरुपमनिजप्रजापरमानुरागानितरसुलभसुकृताशान्तदैवप्रसादशेवधौ विजयमङ्गलप्रत्यूहशङ्कि मे मनस्समजनि। संप्रति भवत्प्रतिबोधनसंप्रतीतियुतमतितमां प्रीतिनिभृतञ्च सुख्यति हृष्यति च। श्वः प्रातरप्यालोबन्धप्रयाणाय सर्वानधिकृतांस्तत्तदधिकारेषु सन्नद्धानारचयितुमवहितो भवतु भवान्।

सचि—यथाह प्रतिनिधिः।

प्रति—

श्वः प्रातर्मडिनाख्यनावि विलसन् श्रीमेरिहस्ताञ्चलं
गृह्णन्नादरतो मदीयवदनं पश्यंश्च बम्बापुरम्।
आगन्तुं त्वरयन्नशेषसुहृदस्सप्रेमहर्षाद्भुतं
भूपस्स्वापसुखप्रसन्ननयनेनालोकनीयो मया ॥ १९ ॥

(नेपथ्ये) भोभो विकटोरियाविरामस्थानाधिकृताः गृह्णीध्वं गृह्णीध्वम्। एष मन्दुरातः परमजवादाधावति कश्चन सेनातुरङ्गः—

छिन्दन्नृजुं पदान्तर्गलसुदृढमितां लङ्घयन्वाजिशाला-
भित्तिं भाण्डानि भिन्दन् सरभसममितस्सादिनो वञ्चयंश्च।
क्रामन्वीथीश्च वाटीवृतिमृदुललतासञ्चयं भञ्जयन्द्रा-
गन्धान्पङ्क्तीश्च मार्गागतमनुजगणान्मर्दयन्भीषयंश्च ॥ २० ॥

प्रति—( आकर्ण्य ) अस्मच्चमूतुरगएव स्यादसावतस्त्वरितपमुमधिगतमदावेशमनुगुणोपायैर्वशीकृत्य मान्दुरिकसविधन्नीयतामिति सेवकजनमाज्ञापय । अहमपि सन्निहितमेव शिबिरं प्रविश्य कञ्चित्कालं निद्रासुखमनुभवामि ।

( इति परिक्रम्य निष्क्रान्तौ )

संविधानन्नाम प्रथमोऽङ्कः ॥

---

## द्वितीयोऽङ्कः

(ततः प्रविशतो घूर्जरबालकौ)

**एकः**—पियवयस्स[1] गोपीणाह कहं उण मोच्चूण मं पलाएसि।

**अन्यः**—(क्षणं स्थित्वा) सखे मधुरानाथ नाकर्णितवानद्य प्रातस्सार्धनवघण्टासमये नलिकानामुच्चण्डं ध्वानं नापि तेषामेकोत्तर-शतं संख्याः संख्यातवांश्च किमसि।

**मधुरानाथः**—कहं[2] ण सुणोमि णलिआणं सद्दम्। कहं वा ण गणेमि ता सव्वा णलिआ। अम्हाणं महाराओ जाज्जचक्कवट्टी समुद्ददुवारं अज्ज साद्धणवघण्टासमअम्मि समागओ सपरिवारो त्ति सुणिअ बम्बाणअरकोटीसराणं राआअमणकोदूहलभरिदाणं धम्मिअधोरेआणं सदणेसु लद्धाइ फलाइ अण्णा अ उवाअणा विविहा भक्खअन्दो णिक्कमिअ तुमं दट्ठूण तुज्झ वि समप्पिदुं उस्सुओ म्हि।

**गोपीनाथः**—(प्रियवयस्यवितीर्णानि मधुराणि फलादीन्यादाय) अहो बम्बानगरकोटीश्वराणां राजपक्षपातो मादृशेषु बालकेषु प्रीतिर्दीनान्धकृपणेषु कारुण्यम्। यतः कश्चन प्रभुधुरीणः प्रथमत एव

---

१. प्रियवयस्य गोपीनाथ कथं पुनर्मुक्त्वा मां पलायसे।

२. कथन्न शृणोमि नलिकानां शब्दम्। कथं वा न गणयामि तानि सर्वाणि नलिकानि अस्माकम्महाराजो जार्जचक्रवर्ती समुद्रद्वारमद्य सार्धनवघण्टासमये समागत स्सपरिवार इति श्रुत्वा बम्बानगरकोटीश्वराणां राजागमनकौतूहलभरितानां धार्मिकधोरेयाणां सदनेषु लब्धानि फलान्यन्यानि चोपायनानि विविधानि भक्षयन्निष्क्रम्य त्वान्दृष्ट्वा तुभ्यमपि समर्पयितुमुत्सुकोऽस्मि।

भारतमण्डलमागतवतो जार्जयुवराजस्य ज्ञप्तये तत्प्रतिरूपशिलामेकहस्त-सङ्घटितदूरदर्शनसुलोचनामितरहस्तविधृतखड्गाञ्चात्युत्तमनिर्माणां त्रिचतु-रादिनतः पूर्वमेव दृश्यवस्तुसंग्रहस्य पुरतः प्रतिष्ठाप्य संप्रत्यागच्छतश्च-क्रवर्तिनस्सदा स्मरणाय सप्तलक्षपरिमिता रूपिकास्सिन्धुबम्बानगरप्रकृ-ष्टकृष्यादिव्यवसायिनामुत्साहपरिवृद्धिधर्मतया वितनार । केचिदतिमहित नृत्तगीतवादित्रपारितोषिककुलदेवताद्याराधनादिकरम्बितमहोत्सवपुरस्सरं राजागमनदिनमामोदन्ते । केचन निस्वबालकेभ्यः पुस्तककवचादी-नि दीनान्धकृपणेभ्यश्चक्रवर्त्यपदानपद्यमुद्रितविविधवसनान्युदग्रषड्रसकर-म्बितभोजनानि रूपिकादीनि च प्रयच्छन्तः परममौदार्यं कृतार्थयन्ति—

ये बम्बानगरे कुबेरसदृशा धर्मैकतानान्तराः
कारुण्यांबुधयो दरिद्रनिचयेष्वन्यादृशप्रीतयः ।
भूपे निस्तुलभक्तयश्च धनिनस्तेषां गुणानद्भुता-
न्नैवालं गादितुं फणाधरपतेर्जिह्वासहस्रद्वयी ॥ १ ॥

मधु—वङ्गमद्देसुं वि धम्मिउत्तमा किं सुणीअन्दि ।

गोपी—तत्रापि बहवस्सन्ति धनिकधार्मिकधौरेयाः प्रतिष्ठापित-विप्राग्रहारहरिहरालयनित्यान्नवेदशास्त्रशालास्सन्ततसत्कृतविपश्चितस्सं-पूर्णराजभक्तयः कृपाभरिताश्च दीनेषु ।

---

१. वंगमद्देष्वपि धार्मिकोत्तमाः किं श्रूयन्ते ।

मधु—गोपीणाह[1] एतस्सिं वि काले पुडमजुगे विअ पुण्णो जेव्व धम्मो वट्टइ । कहिं पत्थिदो सि ।

गोपी—मधुरानाथ अप्पालोबन्धसविधसंयोजितकायमाने तुरीयघण्टासमये श्रीमेरिदेव्या राजप्रतिनिधिहिन्दियामन्त्रिबम्बाभर्त्तृप्रभृतिभिश्च समं विजयमाचरिष्यन्तं श्रीमज्जार्जचक्रवर्तिनमालोकितुं तदामेटप्रभुणा पठिष्यमाणां स्वागतपत्रिकां तदनु मधुरतरमात्मामोदनप्रकाशकं श्रीचक्रवर्तिना समुदाहरिष्यमाणं स्वागतपत्रिकाप्रतिव्याहारञ्च श्रोतुं तत्कायमानमेव गच्छामि ।

मधु—चक्कवट्टिणो[2] समुद्दद्दुवारविजआदो पहुदि चउत्थघण्टासमयपेरन्तवुत्तन्ता किं अवगमीअन्ति ।

गोपी—सखे मित्रान्तरस्य गङ्गानाथस्य मुखादखिलमुदन्तमवगतवानस्मि ।

मधु—कहेदु[3] पिअवअस्सो ।

गोपी—शृणोतु भवान् । यदा सार्धनवघण्टासमये समुद्रद्वारमभिप्रविष्टा श्रीमतो जार्जचक्रवर्तिनो मेडिनानौका । तदा—

आह्वयन्तीव सकलान्बम्बानगरवासिनः ।
ध्वनितानि शतञ्चैकं नलिकान्युच्चकैर्द्रुतम् ॥ २ ॥

---

१. गोपीनाथ एतस्मिन्नपि काले प्रथमयुग इव संपूर्ण एव धर्मो वर्तते । कुत्र प्रस्थितोऽसि ।

२. चक्रवर्तिनस्समुद्रद्वारविजयात्प्रभृति चतुर्थघण्टासमयपर्यन्तवृत्तान्ताः किमवगम्यन्ते ।

३. कथयतु प्रियवयस्यः ।

नलिकध्वानमवसितमनु सा दशमघण्टासमये समुद्रद्वारसमासिकाप्रदेशमागतवती । अधिसार्धदशघण्डावसरमप्पालोबन्धद्वारमागतवान् प्रतिनिधिः विविक्तसचिवेन सह मेडिनास्थितौ चक्रवर्तिदंपती तत्रैव गत्वा सन्द्रष्टुमनुगुणं संविधानं सज्जीकृतवान् ।

मधु—तदो[1] तदो ।

गोपी—तदनु सत्रिपाददशघण्टासमये प्रतिनिधिस्सह मुख्यपरिवारेण प्रविस्य मेडिनां तत्र शचीपुरन्दराविव विराजमानौ चक्रवर्तिनौ विलोक्य सप्रमोदभक्तिः प्रणतशिरास्तयोस्सेवाञ्जलिमाचचार । ततः पादघण्डानन्तरं वंबाभर्ता बम्बाप्राड्विवाकाध्यक्षप्रभृतिभिरुत्तमाधिकारिभिस्समं विगाह्य मेडिनां प्रतिनिधिना विनिवेदितः श्रीचक्रवर्तिनौ विलोकितवान् । यथाचारन्तयोः प्रणामाञ्जलिमाचरितवान् । कलितराजसेवाञ्जलीनामनुगतानामभिधानादीनि च तत्सविधे विज्ञापितवान् । द्वादशघण्टासमये मेडिनातः प्रतिनिवृत्य सपरिवारो राजकीयप्रासादं जगाहे । प्रतिनिधिस्तु तत्रैव मेडिनायां माध्याह्निकीमभ्यवहृतिमारच्य तां विसृज्य बम्बाभर्तृविगाढमेव स्थानं विवेश । प्रविश्य च चक्रवर्तिनः पत्तनप्रवेशसंविधानमखिलमारचय्य समं बम्बाभर्त्रा सार्धतृतीयघण्टासमये समागत्याप्पालोबन्धकायमानमागमनम्मेडिनातश्श्रीमतोश्चक्रवर्तिनोःप्रतीक्षमाणस्तिष्ठतीति ।

---

मधु—सिग्घं[2] गच्छउ भवं सामिघण्टा अवसिट्ठा चउत्थघण्टाए।

१. ततस्ततः ।

२. शीघ्रं गच्छतु भवान् । सामि घण्टाऽवशिष्टा चतुर्थघण्टायाः ।

गोपी—अथकिं । भवानपि मया सह तं विनोदमनुभवितुं किमागच्छति ।

मधु—मह खु उवज्झाएण पाठिअं महाराअचक्कवट्टिणो अवदाणणिवेदअं घुज्जरमहराट्ठभासारइअं गेअं वसीकाअव्वम् । तुवरावेदु भवं । तुह मुहेण सव्वं विणोदं सुणिस्सम् ।[1]

गोपी—( नलिकध्वनिमाकर्ण्य ) सखे चक्रवर्तिनौ मेडिनानौकातस्समवतीर्य अप्पालोबन्धवेदिमागतवन्तावित्येकोत्तरशतनालिकनिनादेन निवेदितौ । ( सत्वरं परिक्रम्य पुरो विलोक्य सहर्षसम्भ्रमं ) नन्वागत एव नगरप्रवेशकुतूहली चक्रवर्ती सह चक्रवर्तिन्या कायमानाभिमुखस्तदधिगतैः स्वागतपत्रिकां वाचयिष्यद्भिर्मेटप्रभृतिभिः पारितोषिकपाणिभिर्मेटादिभिश्चाञ्जलयुवातिभिः प्रतीक्ष्यमाणः प्रतिनिधिहिन्दियामन्त्रिभ्यां सभार्येण बम्बाभर्त्रा समुन्नताधिकारिभिश्चानुगम्यमानः । तदहमप्यतित्वरितं तदेव कायमानं साधयामि ।

( इति निष्क्रान्तौ )

॥ मिश्रविष्कम्भः ॥

---

१. मम खलूपाध्यायेन पाठितम्महाराजचक्रवर्तिनोऽपदाननिवेदकं घूर्जरमहाराष्ट्रभाषाराचितं गेयं वशीकर्तव्यम् । त्वरयतु भवान् । तव मुखेन सर्वं विनोदं श्रोष्यामि ।

( ततः प्रविशति यथानिर्दिष्टश्चक्रवर्ती चक्रवर्तिनी प्रतिनिधिप्रभृतयश्च )

**राजा**—अयि प्राणदयिते—

बम्बेयं स्वपुरी स्वकीयतनयाकन्याधनं या पुरा
मत्पूर्वाङ्गलभूमिपाय परमप्रेम्णा वितीर्णा स्वयम् ।
राज्ञा पूर्तगलाधिपेन महती सा तैलबिन्दोस्समा
तोयान्तः पतितस्य सर्वत इमां व्याप्ता भुवं भारतीम् ॥ ३ ॥

**राज्ञी** — अज्जउत्त[1] सव्वभारदमहीमहाहिवदित्तणणाडअस्स आमुहं खु बम्बारूवं इदं कण्णाधणम् ।

**राजा**—अथकिं ( समन्ततस्समालोक्य सानन्दम् )—

बम्बा विचित्रसमुदञ्चितसौधमाला प्रोत्तुङ्गकेतुविनिबद्धचरत्पताका ।
आमोदतस्ततिरिवात्र वसज्जनानामस्मान् समाह्वयति पश्य महादरेण॥

समुत्तुङ्गे सौधे नगरललना रम्यवपुषो-
विचित्रालङ्काराः प्रमदभरपूर्णाश्रुनयनाः ।
पुरेवास्मान्पश्यन्त्यहह भरतानां नृपगता
ह्यमेयैव प्रीतिर्विलसति नचैवात्र विशयः ॥ ५ ॥

---

१. आर्यपुत्र सर्वभारतमहीमहाधिपतित्वनाटकस्याऽऽमुखं खलु बम्बारूपमिदं कन्याधनम् ।

**प्रतिनिधिः—**

बम्बापुरं सकलमेतदुदीक्षितुं स्वं भूपं जवेन शकटैः प्रमादादुपैति ।
ईदृक्कुतूहलमिहैव समस्तनॄणां डिल्यां भविष्यति कथम्मकुटाभिषेके॥

**हिन्दियामन्त्री—**

नूत्नप्रत्नविशेषरम्यशकटीरारुह्य धन्या गृहा-
दाधावन्ति विलोकयन्ति परितः स्थित्वा मुखं भूपतेः ।
एडन्पत्तनपारितोषिकमिदं कार्ष्णानुपादायुधं
बर्हं मूर्ध्नि विराजमानमपि च श्रीमेरिदेव्यास्तथा ॥ ७ ॥

**बम्बाभर्ता—**

घस्राद्बहोस्मरभसं विहितम्मदीयं बम्बापुरे नृपसमागमनोत्सवाय ।
सम्प्रत्यतीव सकलञ्चरितार्थमास्ते यद्वीक्ष्य तुष्यति नृपश्च तथैव मेरी॥

**बम्बाभर्तृभार्या**—णाह तुह सव्वं संविहाणं विज्जुदप्पदीव-रासिप्पकासो विअ सव्वेसु पदेसेसु अण्णूणं अणदिरिच्चं अ[1] ।

**इतरे—**

समुन्नतेषु स्थानेषु स्थित्वा पश्यन्ति नागराः ।

---

१. नाथ तव सर्वं संविधानं वैद्युतप्रदीपराशिप्रकाश इव सर्वेषु प्रदेशेष्वन्यूनमनतिरिक्तञ्च ।

स्तुवन्ति च नृपं राज्ञीं विन्दन्ति च मुदं दृशोः ॥८॥

**प्रति**—उच्छ्रित्य च भुजौ के चिदाशीर्वाक्यानि मानवाः ।
ब्रुवते केऽपि तन्वन्ति यथास्वमतमञ्जलीन् ॥ ९ ॥

**मन्त्री**—

राजा जनानां प्रणतेन तेषां
सेवाञ्जलीनाददते स्वमूर्ध्ना ।
सर्वाधिपत्यं विनयेन रम्यं
पयः फलम्मिश्रमतीव रुच्यम् ॥ १० ॥

**बम्बाभर्ता**—(समन्दयितया तत्र सम्मिलितैश्च समुन्नताधिकारिभिर्नगरकोटीश्वरैश्च सह चक्रवर्तिसविधमागत्य) सप्रणामं कायमानान्तरायोजितमासनमलङ्करोतु चक्रवर्ती समं चक्रवर्तिन्या ।

**राजा**—'तथा' (इति पारिक्रामति)

**प्रतिनिधिप्रभृतयः**—इतइतो देवो देवीच ।

**राजा**—(चक्रवर्तिन्या साकं परिक्रम्य कायमानान्तरे विनिवेशितमेकमासनमारोहति चक्रवर्तिनी चापरम् । प्रतिनिधिहिन्दियामन्त्रिबम्बाभर्तृमेटप्रभृतयो दक्षिणतश्चक्रवर्तिनः । बम्बाभर्तृभार्यामेटाप्रभृतयो वामतश्चक्रवर्तिन्याः प्रणम्योपविशन्ति । यथार्हमितरेच )

मेटः—( समुत्थाय सेवाञ्जलिञ्च समारच्य ) राजाधिराज राज-परमेश्वर भारतचक्रवर्तिन्—

सकृत्पूर्वन्दत्वा दृगमृतमिहत्याखिलनृणां
चकोराणां किञ्चित्तुहिनमिव राकाशशधरः ।
कृपावेशादेषु ध्रुवमिह पुनर्यासि विजयं
विभो लण्डन्कुत्र क्व नु पुनरियं बम्बनगरी ॥ ११ ॥

दैवी सम्पद्भवति न मनाग्यस्य स स्वीयकृत्यं
स्वल्पं कर्तुं स्वयमिह विभु नैव धीरोऽपि मर्त्यः ।
निस्सापन्त्यं भरतधरणीचक्रवर्तित्वमेत-
द्दैवीं पूर्णां कथयति विभो सम्पदं सर्वदा वः ॥ १२ ॥

निष्प्रत्यूहं मकुटधरणञ्चायतां डिल्लिपुर्या-
मारोग्यं स्यान्नृपतिलक ते सन्ततम्मेरिदेव्याः ।
त्वत्त्राणामपिच भवतश्शासने तिष्ठतान्न-
स्त्रिंशत्कोटीपरिमितिमताश्चिन्तितञ्चास्तु पूर्णम् ॥ १३ ॥

( इति सकुतूहलं स्वागतपात्रिकां वाचयति )

राजा—( सानुरागं )—

प्रीतिं युष्माकमस्मास्वनवधिमवगम्याप्नुमस्सम्प्रमोदं
युष्मान्द्रष्टुं कृतज्ञान्मकुटधृतिमिषाद्भूयएवागता स्स्मः ।
बम्बा पूर्वं स्वकीयं वशमुपगमिता वृद्धिमेषा यथाऽगा-
द्बम्बानृणान्तथैव प्रतिपदमयते प्रीतिरस्मासु वृद्धिम् ॥ १४ ॥

(इति सविलासमतिगम्भीरं प्रतिव्याहारमुदीर्य सकलजनकरतालक-लकलपुरस्सरं रजतपेटिकान्तरविनिक्षिप्तमर्पितमभिनन्दनपत्रं स्वीकरोति)

**मेटा**—(सरभसमुपेत्य) वन्दामि[1] चक्कवट्टिणिं। (इति प्रणामाञ्जलिमारच्य तत्रभवत्यै श्रीभैरिदेव्यै स्थलकमलिनीकुसुमशेखरमति-सुन्दरमपरिमितपरिमलमर्पयति।)

**राज्ञी**—बहु[2] भवुअं बहु भवुअं (इति सानन्दं गृह्णाति)

**राजा**—(बम्बाभर्त्रा निवेदितानां सेवाञ्जलीनानन्द्य समुत्थाय समं राज्ञ्या रमणीयं रथसन्निभमनुगुणं शकटमारुह्य द्वैतीयीकं शकटमारू-ढाभ्यां प्रतिनिधिहिन्दियामन्त्रिभ्यां तृतीयं शकटमधिगतेन सभार्येण बम्बा-भर्त्रा तुरीयादिशकटपञ्चकमधिरूढैरुन्नताधिकारिभिश्च साकं नगरप्रवेश-नाटितकेन) अयि देवि अप्पालोबन्धवीथीं पश्य—

किं किं ब्रूमो वयमिह महादैवसंपत्तिमस्मा-
स्वस्यां वीथ्यामहह मनुजा स्स्वस्वमित्राप्तवर्गैः।
ऊर्ध्वोदस्तस्वकरकिसला भक्तिमव्याजसिद्धा-
मागोपालं भरतधरणीवासिनो दर्शयन्ति॥ १५॥

**राज्ञी**—णाहं[3] पेक्खदु भवं (संस्कृतमाश्रित्य)

सपत्नीभावमुत्सृज्य त्वयि बद्धादरा मया।
समं भारतराज्यश्री स्सोत्कण्ठन्त्वां प्रतीक्षते॥ १६॥

**राजा**—अयि सुन्दरि अत्रापि पश्यतु भवती—

अमी दीना लोकाश्शकटरमणीयांबरमुखै
र्विहीना स्स्वैरत्र प्रथितमहिताडम्बरधरान्।

---

१. वन्दे चक्रवर्तिनीं। २. बहु भवुकं ३. नाथ पश्यतु भवान्।

ब्रुवन्त्याढ्यानित्थन्धानिन इदमर्हन्न भवतां
दुरापस्यास्माकं नृपमुखविलोकस्य पिहितम् ॥ १७ ॥

राज्ञी—णाह कप्पादेवीपहुदिसु बिसालासु वीहीसु अम्हाणं दंसणं रित्तजणसुलहं मण्णे ।[1]

प्रतिनि—हिन्दियामन्त्रिन्—

बहूनाम्मध्येऽहं प्रतिनिधिवराणामनुपमो-
विधानैर्भारत्यामिह हि भुवि सर्वत्र सदृशैः ।
नृपालं यस्साक्षान्मकुटलसितं कर्तुमचिरा-
दमोघाज्ञापत्रं शिरसि धृतवान् शेखरमिव ॥ १८ ॥

हिन्दियामन्त्री—

अस्माकमखिलानां यत्प्राक्तनं सुकृतम्महत् ।
तस्यैव परिपाकोऽयं नो चेत्कथेदृशभावुकम् ॥ १९ ॥

(शकटानि तत्र तत्र समुदितसकलजननयनानन्दनानि सोल्लासं क्वचिन्मन्दं क्वचिद्द्रुतञ्च चलन्ति ।)

बम्बाभर्ता—(समन्ततो विलोक्य) अहो नगरमखिलं प्रदक्षिणीकृत्य पुनरिदं चक्रवर्तिशकटमप्पालोबन्धद्वारसविधमागतम् (इति समुदीरयन् सत्वरमवतरति)

प्रतिनिधिः—(हिन्दियामन्त्रिप्रभृतिभिस्सह त्वरितमवतीर्य नृपसविधमागच्छति)

राजा—(शकटादवतीर्य मेडिनां प्रवेष्टुं राज्ञीहस्तमालम्बते ।)

---

१. नाथ कल्पादेवीप्रभृतिषु विशालासु वीथीष्वस्माकं दर्शनं रिक्तजनसुलभं मन्ये ।

**प्रतिनि**—(सर्वानवलोक्य) सार्धपञ्चकमजनि घण्टानाम्। सर्वतो नगरवीथीषु नागरधनिकसौधेषु देवतालयप्रासादेष्वट्टालकचत्वरमण्डपेषु सर्वासु विविधनौकासु समुज्ज्वलन्ति वैद्युता नूतनाः पुरातनाश्च प्रदीपा ज्योतिर्मयमिव सकलभुवनमावेदयन्ति च। तदखिलाः स्वं स्वमावासं प्रतिष्ठन्ताम्। सान्निहितस्य मकुटाभिषेकमङ्गलस्य "श्रेयांसि बहुविघ्नानि" इति समूहनीयफलविघातिप्रत्यूहध्वान्तनिरासाय महितडिल्लिनगरसंविधानप्रत्यक्षीकृतये च त्वर्यते मे मनः। चक्रवर्तिनावपि चिरनगरप्रवेशपरिश्रमपरिश्रान्तौ मेडिनानौकायां विश्रान्तिसुखमनुभवितुकामावासाते। बम्बाभर्त्रा च पदेपदे बम्बापुरे समनुभूयमानानि विविधविनोदमङ्गलानि तन्त्रीसरण्या पत्रीद्वारा पुरुषमुखेन च प्रेषणीयानि। (इति सरभसमुदीर्य राजकीयप्रासादप्रतिनिवृत्तये राज्ञोऽस्सेवाञ्जलिं करोति)

**राजा**—अयि राज्ञि नगरमखिलमालोकय ज्योतिर्मयम्—

अन्तर्ज्योतिस्स्फुरति यमिनां ध्वान्तसंघे विनष्टे
ब्रह्मानन्दः प्रसरति ततश्चाद्वयाखण्डरूपः।
इत्थं वक्त्री श्रुतिरवितथा नामशेषेषु शत्रु-
ष्वेतज्ज्योतिर्मकुटधरणानन्दपूर्वोद्गतं यत् ॥ १० ॥

तदावामपि मेडिनामेव प्रविश्य समामन्त्रितामित्रजनपरमविलासातिथ्यनिर्वर्तनमङ्गलपुरस्सरं विश्रान्तिसौख्यमाधिगच्छावः।

(इति निष्क्रान्तास्सर्वे)

**बम्बाप्रवेशो नाम द्वितीयोऽङ्कः ॥**

## तृतीयोऽङ्कः

( ततः प्रविशतो लेखहस्तौ पुरुषौ )

**प्रथमः**—( सस्मरणाद्भुतं ) अहो श्रीमतो जार्जचक्रवर्तिनो महिमातिशयः । यस्य बम्बानगरसमुद्द्वारसविधे चरणकमलयुगलविन्यासादनुपदन्तत्तन्मण्डलशासकोपशासकस्वदेशविभूषणनैजाम्मुखमहनीयमहाराजवसुमतीस्वामिवरमठाधिपतिप्रमुखभारतमण्डलीप्रमुखसविधतः स्वप्रणामाञ्जलिविज्ञापनपुरस्सरं तन्त्रीद्वारा समागताः स्वागतपत्रिकास्तन्त्रीस्थानात्परश्शतैर्भारवाहिभिस्संपूर्णभारसन्निभमुदुह्य शिरोभिरस्मत्स्वामिनो बम्बाभर्तृगृहाङ्गणमुवमानीताः ।

**द्वितीयः**—वयस्य किमुच्यते—

विक्टोरियावंशकरीर एष साक्षाच्चतुर्बाहुनवावतारः ।
यस्मिन्नसाधारणदेवदेवप्रसादसम्पत्परिवृद्धिमेति ॥ १ ॥

**प्रथ**—( अध्वश्रममभिनीय । पुरोऽवलोक्य ) संप्राप्तेयं डिल्लिनगरी । ( किञ्चित्प्रवेशनाटितकेन । समन्ततो निरूप्य ) अहो निरतिशयमौदार्यं राजप्रतिनिधेश्शेखरीकृतचक्रवर्तिशासनानां स्वदेशमहारा-

जवर्याणामपि । यदेते विद्वत्कविवराः स्वभावरमणीयानष्टकदशकमञ्जरी रत्ननक्षत्रमालिकाशतकादिनामाङ्कितान् जार्जचक्रवर्तिमकुटाभिषेकसम्मोदनपरान् खण्डकाव्यप्रबन्धांस्तत्तदाश्रितमहोन्नताधिकारिमुखतः प्रकाश्य बहुविधानि पारितोषिकाणि विन्दन्ते ।

**द्वितीया**—( सम्यङ्निर्वर्ण्य सप्रत्यभिज्ञाश्चर्यमपवार्य ) वयस्य पश्यपश्य—

सामान्यप्रभवो विशेषविभुतालभ्यन्धरित्रीपतेः
श्रीमेरीकमितुर्विलोकनसुखं लब्धुं किरीटोत्सवे ।
वन्दिष्वेकतमा भवन्ति कति चिद्वीणामृदंगादिषु
प्रावीण्यं गतवत्सु मध्यगततां गायत्सु यान्तीतरे ॥ २ ॥

**प्रथ**—अहो श्रीमतश्चक्रवर्तिनो बम्बाविजयविविधविनोदमङ्गलश्रवणकुतुकिता डिल्लिनगरसम्मिलितानां भारतानाम् । यदावामनुसरन्ति पुनःपुनरनुयोगपौनरुक्त्येन। तत्सखे प्रकाश्यतां किञ्चिच्चक्रवर्तिनो विनोदोदाहरणम् ।

**द्वितीया** ( किञ्चिदुच्चैः ) भोभोश्रूयतां भारतसार्वभौमभवुको दन्तः—

यस्मिन्नहन्यागतवान् स बम्बां तस्मिन्निशायां कृतवानधीशः ।
लीलाभुजिं नावि सुहृद्भिरिन्द्रः पीयूषपीतिं विबुधैर्दिवीव ॥ ३ ॥

तत्र समाहूताः प्रतिनिधिबंबाप्राड्विवाकप्रमुखास्समुन्नताधिकारजुषः

प्रथ—नूनमेषु दिवसेषु राजप्रतिनिधिस्सन्ततसङ्गतनैजांप्रमुख-स्वदेशमहाराजैर्लार्ड् कार्मिकेल् प्रभृतिमद्रादिशासकोपशासकैश्च सह यमुनारोधसि विरच्यमानराजकीयसभारामचमूसन्निवेशादिस्थानानि पदेपदे परीक्षमाणो गमयति वासराणि ।

द्वितीं—उचितमनुचिन्तितं वयस्येन ।

प्रथ—( पुरतो विलोक्य । सानन्दं ) अयमस्मदीयं वचनमाकर्ण्य नूनं प्रतिनिधिस्वीयसचिवप्रियवयस्यः प्रतिनिधये निवेदयितुं सहर्षसम्भ्रमं प्रतिनिधिशिबिराभ्यन्तरं प्रविशति । तदावामपि प्रतिहारभूमिमध्यास्य प्रतिनिधेरवसरं प्रतिपालयिष्यावः ( इति परिक्रामतः । )

( ततः प्रविशति प्रतिनिधिस्वीयसचिवप्रियवस्यः )

प्र....यस्यः—अहो मम धन्यता। यदीदृशानां चक्रवर्तिविनोदोत्सवानां निवेदयिताऽस्मि संवृत्तः यन्मया विनिवेदितैश्श्रवणप्रियङ्करैर्वार्ताभृतैः प्रतिनिधिप्रमुखाः भाविनम्मकुटाभिषेकानन्दमप्यतिशयानमानन्दमनुभविष्यन्ति । ( पुरोऽवलोक्य ) कथमयं प्रतिनिधिर्नैजांप्रमुखैस्स्वदेशमहाराजैर्मद्रभर्त्तृलार्ड्कार्मिकेलप्रभृतिभिरन्यैश्च महाधिकारिभिः परिवृतश्शिबिरान्तरास्थानमण्डपमधितिष्ठति । तदहमुपसर्पामि ( इति परिक्रामति । )

(ततः प्रविशति यथानिर्दिष्टः प्रतिनिधिः स्वदेशनृपाः मद्रभर्तृप्रमुखाश्च)

**प्रतीनि**—(सविमर्शाश्चर्यमखिलान् प्रति) अहो विश्वातिशायित्वेऽपि लालित्यमुचितज्ञता च श्रीमतश्चक्रवर्तिनः । तथाहि—

अखण्डे साम्राज्ये निरवधिनि शौर्येऽपि नितरा-
मगाधे गाम्भीर्ये सति लसति वीर्ये च महति ।
अमेयम्माधुर्ये वचसि वदने मन्दहसितं
प्रसादः कोऽप्यक्ष्णोः कथयति नृपं विष्णुमपरम् ॥ ४ ॥

किञ्च—

रिक्तेष्वाढ्येषु बालेष्वपि नृपतिलको वृद्धवर्गेषु विद्व-
त्स्वन्येषु प्राकृतेषु प्रकटितकरुणो बम्बयीराजधान्याम् ।
तत्तद्योग्यामुदाराम्मधुरिमभरितां वाचमन्यादृशीञ्च
व्याकुर्वन् सर्वनृणामहह भृशमसौ हर्षयत्यन्तराणि ॥ ५ ॥

**स्वदेशनृपाः**—

नो चेदीदृशमौचित्यम्माधुर्यं वचसामपि ।
अखण्डसार्वभौमत्वं कथञ्जगति सेत्स्यति ॥ ६ ॥

**मद्रभर्ता**—

न किरीटादिभिश्चिह्नैर्नृपालस्य नृपालता ।
गुणैरेव तु लालित्यवचोमधुरतादिभिः ॥ ७ ॥

**प्रतिनि**—( सौत्सुक्यं ) कथं चिरयति चक्रवर्तिनो बम्बानगर-विनोदमङ्गलश्रवणमहोत्सवः ।

**प्र....यस्यः**—(सविनयरभसमुपसृत्य सप्रणामं) प्रभो बम्बाभर्त्तृ-प्रेषितौ चक्रवर्तिविनोदकौतुकवार्ताहरौ प्रांतेहारभूमिमधिवसतः ।

( सर्वे सहर्षातिशयं निरूपयन्ति )

**स्वदेशनृपाः**—भद्र शीघ्रं प्रवेशय ।

**प्र....यस्यः**—यदादिशन्ति स्वदेशनृपतयः (इति निष्क्रम्य सह ताभ्यां पुनः प्रविष्टः )

**पुरुषौ**—( प्रणमन्तावुपसृत्य ) देव विश्वैकसार्वभौमस्य बम्बा-नगरविनोदाः कुत आरभ्य कथनीयाः ।

**प्रतिनि**—मम बम्बापुरादितः प्रस्थानादारभ्य चक्रवर्तिविह्व-तिपल्लवास्सदसः कर्णपूरीक्रियन्ताम् ।

**प्रथमः**—श्रीमन्तौ चक्रवर्तिनौ डिसम्बरतृतीयदिवसे मध्यन्दिने सभार्येण बम्बाभर्त्रा साकमधित्यम्बाभर्त्तृप्रासादमारचितमध्यकालभोजनौ सायमाकलितदेवसेवनौ रात्रौ मेडिनायामेव कस्यै चिद्विनोदभुक्तये सभार्यं बम्बाभर्तारं बम्बाप्राड्विवाकाध्यक्षं बम्बानिर्वाहकसभाध्यक्षानैरोपान् हि-न्दुषु मान्यान् मिस्टर् आकाकान्प्रभृतीश्चामन्त्रयामासतुः ।

**प्रतिनि**—प्रियवयस्याः स्वदेशनृपाः श्रीमतोश्चक्रवर्तिनोर्विशेष-तस्मुह्यद्भिस्सजग्धिकेलिप्रियता ।

**स्वदेशनृपाः**—

एकः स्वादु न भुञ्जीतेत्यस्ति शास्त्रं यतस्ततः ।
चक्षुष्मान् शास्त्रतः श्रीमान् सजाग्धिरभसः प्रियैः ॥ ८ ॥
भद्रौ डिसम्बरतुरीयदिनविनोदानपि वर्णयतम् ।

**प्रथ** — तस्मिन्दिने चक्रवर्तिनौ दिवा सार्धनवघण्टासमये विद्याशालाबालाना मुल्लासमालोकितुं राजवेषेण मेडिनातस्समवतीर्य सन्निधापितेषु चतुर्षु शकटेषु राजार्हे प्रथमशकटे विराजमानौ द्वितीयतृतीयतुरीयशकटारूढैर्हिन्दियामन्त्रिटेकाधिपतिप्रभृतिभिरनुगतौ मेयोयास्पिळनेट्शालामार्गेण दशघण्टासमये विचित्रदृश्यवस्तुशालासविधं समागत्य । तत्र सज्जीभूतेन सभार्येण बम्बाभर्त्रा बम्बाप्राड्विवाकप्रमुखैरुत्तमाधिकारिभिश्च सादरं प्रत्युद्गतौ । शकटीतस्समवरुह्य तदासिकार्थविनिर्मितकायमानान्तरायोजिते तदर्हवरासने अध्यतिष्ठताम् । यथार्हमितरे सन्निधेयास्तत्र सन्निवेशितान्यासनानि भेजिरे ।

तदानीन्तत्र पङ्क्तिक्रमेण स्थितेषु सप्तसहस्रीपरिमितेषु बालकेषु मधुरध्वनयः के चन घूर्जरमहाराष्ट्रादिभाषारचितानि राजगीतान्यतिमधुरमगायन् । अनन्तरमतिदृढावयवाः के चन विविधविषयेण रमणीयव्यायामेन चक्रवर्तिनावनन्दयन् ।

तदा चक्रवर्ती तत्र समुदितानां नौकासैनिकपतीनां समाजमध्यगतं वर्षचतुष्टयतः पूर्वमुत्तरामेरिकाकानटाप्रयाणकाले स्वसमारूढनौकायां दृष्टचरं पिळाक्लेप्टिनण्टमालोक्य सस्मरणसन्तोषं तमानाय्य सविधं तत्कराञ्चलं स्वकराञ्चलेन तोलयामास ।

**स्वदेशनृपाः**—( ससम्मोदं )

शक्तिं स्मृतेरहह पश्यत सर्वभूमीसाम्राज्यसर्वविधिवासितचेतसोऽस्य।
प्रातर्विलोकितपदार्थविशेषमेते सायं स्मरन्ति न हि बोधितमप्यनेकैः॥

**प्रतिनिधिः**—

जीवेषु तुल्येषु विशेषलक्ष्मीरेकत्र पुंस्येव यथा विलोक्या ।
विद्वत्स्वनेकेषु तथा समेषु शक्तिः स्मृतेः कुत्र चिदेव दृश्या ॥

**मद्रभर्ता**—भद्रावतः परमाख्यातं विख्यातं चक्रवर्तिविनोदम् ।

**प्रथमः**—अनन्तरमू चक्रवर्तिनौ दृश्यवस्तुशालाध्यक्षेण सादरमुपदर्शितैर्नयनानन्दनैर्यथापङ्क्ति समाचितैर्विचित्रदृश्यवस्तुजातैश्चवसोरिव बालकगीतैर्लोचनयोरप्यमन्दमानन्दमाभजताम् ।

**द्वितीयः**—ततस्ततः प्रस्थाय यथापूर्वं शकटमारुह्य प्रदक्षिणीकृत्य नगरं प्रत्यागत्याप्पालोबन्धद्वारं सह परिवारेण मेडिनामेव प्रविश्य विश्रान्तिसौख्यमन्वभवताम् ।

तस्यामपि रात्र्यां नागरैस्सविशेषमलंकृतं विविधवैद्युतादिप्रदीपैस्समुद्भासितं नानाभारतचीनाङ्गलदेशतस्समागतैरत्याश्चर्यकरैर्बाणविशेषैश्च समुद्घोषितमखिलानन्दनमासीत् ।

**स्वदेशनृपाः**—ततस्ततः ।

**प्रथमः**—एतावदेव दृष्टचरं वृत्तमतः परं श्रुतचरमेव ।

**स्वदेश**—तदपि निवेदयतम् ।

**प्रथ**—'डिसम्बरपञ्चमदिने प्रातश्चक्रवर्तिनौ यलिपेण्टागुहास्सन्दृश्य । रात्रौ मेडिनायामेव समाप्य भुक्तिकेलिम् । राजवेषभूषितौ

दशमघण्टासमये समभिन्दियामन्त्रिप्रभृतिभिरधिकारिभिष्टेकाधिपादि-भिर्बन्धुमित्रपरिवारैश्च निष्क्रम्य मेडिनातः । सपाददशघण्टावेलायाम-प्पालोबन्धद्वारमागत्य । राजप्रस्थानसूचकेषु समुद्घोषितेष्वेकोत्तरश-तनलिकेषु विक्टोरियाविरामस्थानं प्रति यातुमग्रिमं शकटमारुह्य । द्वितीयतृतीयतुरीयादिशकटारूढैरिन्दियामन्त्रिटेकाधिपतिप्रमुखैस्सह म-न्दमन्दं सर्वतस्समुद्भासितैर्ज्योतिर्मयमिव जगत्प्रदर्शयद्भिर्वैद्युतदीपै-स्समलंकृतेन निद्रासुखमपि परित्यज्य तदतिशयितं चक्रवर्तिमुखकमल-दर्शनसुखमनुभवितुमुभयपार्श्वतस्तिष्ठद्भिः पौरजनैर्निबिडितेन अप्पालो-पन्दर्. यस्पिळनेट्. हारन्पिमार्गेण प्रयाय । परमसुन्दरमलंकृतं सर्व-तश्शोणपटीभिरास्तृतान्तरवेदिकादिशिलातलं लम्बमानकमनीयचीनदेशी-यरथाम्बरसम्मिलितसकलस्थूणं स्निग्धमसृणहरितदर्शनीयविचित्रकुसुम-वल्लीमतल्लीविभूषितसकलप्रदेशमनेकविधरागप्रकाशसमुद्भासमानैः पर-स्सहस्रैर्वैद्युतादिप्रदीपैर्मण्डितं विक्टोरियाविरामस्थानं गमिष्यतः ।

द्वितीयः—सपदि सभार्यो बम्बाभर्ता बम्बाप्राड्विवाकाध्यक्षादय-श्च चक्रवर्तिनौ सादरं प्रत्युद्गम्य तौ तत्परिवारांश्च तदर्थं पार्थक्येन सज्जीकृतं दशभिश्शकटैस्संयोजितं रमणीयमूष्मयानं नेष्यन्ति । इति । अतः परमुदन्तन्न जानीवः ।

प्रतिनिधिः — समनन्तरवृत्तान्तास्तन्त्रीद्वारा ज्ञाता एव । भद्रौ विश्राम्यतम् ।

पुरुषौ — यथा ज्ञापयति प्रभुः ( इति सप्रणामं निष्क्रान्तौ )

स्वदेशनृपाः— प्रतिनिधे समनन्तरवृत्तमपि श्रोतुमुत्सुकास्स्मः ।

प्रतिनि—ऊष्मनेयशकटेषु प्रथमं शाकटिकजनैर्द्वितीयं टेकाधिपतिप्रभृतिभिरारूढम्। ततस्समायोजितयोः प्रसाधितशकट्योरारोहदेकश्चक्रवर्तिनी चक्रवर्त्तिचापरं। तदनन्तरशकटानीन्दियामन्त्रिदेवनस्वामिनीषाष्टस्परिभर्त्तृप्रमुखास्समारोहन्। तदानीं सत्रिपाद्दशघण्टासमये राजशकटे चलति राजदंपती शकटगतावेव प्रयाणसमयसन्दर्शनागतबम्बाभर्त्तृमुखानां सेवाञ्जलीन् जयघोषांश्च समानन्द्य डिल्लीविजयाय समुत्सुकावभवताम्। राजशकटचलनतः परं साज्जितं पृथक्शकटमारुह्य बम्बाभर्ता सभार्यस्सपरिवारश्च डिल्लीं प्रास्थितेति।

स्वदेशनृपाः—प्रतिनिधे गलितमेकं पत्रमधः पतितं तदपि वाचयतु भवान्।

प्रतिनि—(ससम्भ्रमन्तदादाय वाचयति) डिसम्बरपञ्चमदिवसे चक्रवर्ती रात्रावप्पालोबन्धद्वारे बाष्पयानप्रविधे च समवतीर्य तत्र सन्निहिताय चमूपतये बम्बाविजयचिह्नभूतां स्वनामाक्षरमुद्रितां स्वप्रतिकृतिं राज्ञीप्रतिकृतिञ्चान्येभ्यश्च राजचिह्नाक्षरङ्कितकनककवचबन्धनप्रमुखानि तत्तदर्हपारितोषिकवस्तूनि वितनार।

मद्रभर्ता—मकुटाभिषेकसमयेऽपि कनकमयकवचबन्धनानि नगरपालनाधिकारिभ्यश्चक्रवर्तिना साक्षाद्दास्यन्तइति श्रूयते।

प्रतिनि—अथकिम। अहो स्वदेशनृपाः सकलमपि राजसभाराजशिबिरसेनानिवेशनादिविनिर्माणादि संविधानं सज्जीकृतम्। पदेपदे च मया प्रत्यक्षीकृतमुत्तमाधिकारिभिरवहितैस्संरक्ष्यते।

**स्वदेश**—प्रतिनिधे श्वः प्रातरत्र विजयमाचरिष्यतश्चक्रवर्तिनो नगरप्रवेशकौतुकमेतादृशमिति निश्चेतुं ह्यः प्रातः परीक्षायै भवता निर्वर्तितन्तदखिलजनानामनिर्वचनीयमेव सम्मदमदिशत् ।

**प्रतिनि**—चित्रकारविविधसुन्दरालेख्यानां स्निग्धमसृणरमणीयभित्तिरिव मदीयसकलसंविधानानामनुगुणा पुरीयमुरुतराविभवा डिल्ली निरूपिता । तथाहि—

इन्द्रप्रस्थपुरीति या किल कुरुष्वत्यन्तवैचित्र्यभूः
श्रीमद्धर्मसुतस्य राज्यसमये श्रीखाण्डवाख्ये वने ।
ख्याता श्रीमदशोकभूपतिलकोऽप्यन्याद्दशैर्विक्रमैः
श्रीहर्षाभिधविक्रमोऽप्यकुबरोऽप्यन्ये च यां लेभिरे ॥ ११ ॥

कालायसस्तम्भमतीव यस्यां दृढं विशालोन्नतमद्भुतञ्च ।
कृप्तं ध्वजस्तंभमुदाहरन्ति विष्णवालये चन्द्र[हर्ष]नृपेण पूर्वम् १२॥

यस्यामद्यापि—

षाजिहाननृपनिर्मितं महत्सौधमण्डपसमेतमद्भुतम् ।
दृश्यते नृपगृहं समस्तभूमण्डनं नयननन्दनं नृणाम् ॥ १३ ॥

यस्यां द्विलक्षमनुजा निवसन्ति वीथ्यो
बह्वायतास्सकललोचनहर्षदाश्च
नानाविधानि विलसन्ति च वस्तुजाता-
न्यत्यद्भुतालयममूतिसुधागृहाणि ॥ १४ ॥

किञ्च—यस्यां षाजिहानचक्रवर्तिना विनिर्मितं त्रिंशल्लक्षरूपिकामूल्यमनेकविधमणिरत्नचित्रितं कनकमयम्मयूरासनमेकमासीत् । यत्पकतूर्षाचक्रवर्तिसमये स्वनगरमभियुक्तवता नातर्षाचक्रवर्तनापहृतम् । यदद्य टेकिरान्मण्डले वर्तते ।

( प्रविश्य पटाक्षेपेण नृपशिबिरनियुक्तः प्रधानकिंकरः )

किंकरः—महाप्रभो कश्चन वैदेशिकसैनिकः सविधे राजकीयशिबिरस्य धूमपत्रधूपमासेवमानः स्फुलिङ्गप्रसरमुत्प्रेक्षितवता मया निष्टिद्धः 'कस्त्वं वराकः किंकरकीटश्च मां निषेद्धुं' इति रोषशोणलोचनाभ्यामग्निकणसन्निभाभ्याम्मामुदीक्ष्याधिक्षिप्तवान् ।

प्रतिनि—कः कोऽत्र भोः ।

( प्रविश्य प्रतीहारी )

प्रतीहा—अज्ज[1] पणमामि को णिओओ अणुचिट्ठीअदु ।

प्रतिनि—अमुं किंकरमात्मीयसचिवसविधं प्रापय स एव यथायोग्यमाचरतु ।

प्रतीहा—जेहा[2] सासणं (इति किंकरेण सह निष्क्रान्तः)

स्वदेशनृपाः—प्रतिनिधे भवत्येवमशेषजनेषु पारुष्यलेशमप्यनुपदर्श्य भारतमण्डलीमखिलामाशासत्याखेटकादिविविधयुवराजविनोदमेव बहुमन्यते चक्रवर्ती ।

प्रतिनि — श्रीमतश्चक्रवर्तिनस्सप्तमैर्द्वुचक्रवर्तिसमये तथा

---

१. आर्य प्रणमामि को नियोगोऽनुष्ठीयताम् ।

२. यथा शासनम् ।

विनोदवतोऽपि नाद्य तादृश इति दृढतरमवैमि । तदास्ताम् । प्रकृत-मनुसरामः—

मकुटाभिषेककुतुकं निर्वर्तयितुं वयञ्च यूयञ्च ।
दैवप्रसादसम्पत्सकलमिदं साधनन्नु पर्याप्तम् ॥ १५ ॥

(नेपथ्ये सायन्तनशङ्खध्वनिः। सर्वे कर्णन्ददति)

प्रतिनिधिः—

शङ्खोऽयं किल भञ्जय त्वमनिशं श्रीजार्ज राजन्निपू-
निल्येवं भणितुं कुतुहलयुतः प्रकम्य निश्शत्रुताम् ।
ज्ञात्वा भंध्वनिमेव कम्बुरसकृच्छब्दायते नान्यमि-
त्येतां बुद्धिमुपानयन्वितनुते भंभंरवं सन्ततम् ॥ १६ ॥

अहो स्वदेशनृपाश्शासकोपशासकमुखाधिकारिणश्च श्वः प्रात-स्सेलिङ्कास्थाने विजयमाचरिष्यतोश्चक्रवर्तिनोस्सन्दर्शनाय यथाविनिर्दि-ष्टमुद्देशमागन्तुं तत्ताद्भिरुदभूषितास्सज्जीभवत । अहमपि सभार्यस्सज्जी-भविष्यामि (इति निष्क्रान्तास्सर्वे)

॥ पत्रिकावृत्तन्नाम तृतीयोऽङ्कः ॥

---

## चतुर्थोऽङ्कः

(ततः प्रविशति वन्दी शिष्यश्च)

वन्दी—(सरोषं) अरे रे मुग्धकण्ठ मधुरमधुराणि राजगीतान्यवशीकृत्य दिनानि बहूनि कथा सह त्वया नीतानि। प्रजागरारुणलोचनयुगलेन जारचोरभावः कथं न विशङ्कितस्त्वया दास्याःपुत्रेण! आङ्गलप्रवृत्तीनां निष्प्रत्यूहकुलदेवताप्रसादेन प्रजानां भागधेयेन भारतमण्डल्यास्तपोविशेषेणास्मादृशस्य वन्दिजनस्य सुकृतपरिपाकेन चेदं भारतप्रधानभूतं धर्मतनूजादिभिरध्युषितपूर्वं डिल्लीनगरं सकलस्वदेशमहाराजादिसमक्षमनुभविष्यमाणमकुटाभिषेकमङ्गलश्रीमान् जार्जचक्रवर्ती लण्डनतस्समुपगतः। एवमपि रसिकजनहृदयङ्गमानि वादनीयानि गातव्यानि पाठ्यानि च स्मृतिपथमधिगमयितुमाकुलं जरठम्माम्मुक्त्वा कुत्र गतोऽसि।

शिष्यः—सामि[1] पासिदपसीद (इति पादयोः पतति)

वन्दी—(सभ्रूभङ्गं) दास्याःपुत्र फूत्कारेण बाष्पशकटीदहनं प्रशमयसि। यत्प्रणतिवञ्चनयैतादृशमपराधं शिथिलयसि।

शिष्यः—ऐआरिससहावो जेव्व गुरुअणो। ता अकारणकोवं अह्मारिसजणदुज्जणं होन्तं अणुवट्टिदुं अहं ण पारेमि।[2]

---

१. स्वामिन् प्रसीदप्रसीद। २. एतादृशस्वभाव एव गुरुजनः। तस्मादकारणकोपमस्मादृशजनदुर्जनं भवन्तं मनुवर्तितुमहन्न पारयामि।

वन्दी — (सकोपतर्जनोद्वेजनं) दुर्ललितं गुरुतिरस्कारिणं त्वामस्मिन् स्तम्भे बध्नामि (इति बन्धनन्नाटयति)

शिष्यः—(सभयकम्पं) सामि[1] असरणं अणवराहं अ रक्खेहि रक्खेहि मं। होन्तस्स भइणीए उत्तेण समं चक्कवट्टिणो णअरपवेसविनोदा ओळोइदवन्तस्स मह अवराहं इमं एक्कं सहस्स पुव्वं जेव्व गेआइ[2] वसीकिदाइ (इति सविनयं पुनःपुनः प्रार्थयते।)

वन्दी—(सप्रसादं)—मुग्धकण्ठ दिष्ट्या गलितबन्धनोऽसि। प्रदर्शय वन्दिशालां।

शिष्यः—(सहर्षावेगं हस्तावलंबनं दत्वा) इदो इदो सामी।

वन्दी—(किञ्चित्परिक्रम्य। पुरोऽवलोक्य) कथमेष महाङ्गलप्रतीहारस्ससम्भ्रमन्निर्गतः। तत्प्रत्यासन्नइव मकुटाभिषेकगमयः तदावामपि मङ्गलराजगीतानि गातुं राजकीयाभिषेकमण्डपाभ्यन्तरमेव प्रविशावः (इति निष्क्रान्तौ)

॥ मिश्रविष्कम्भः ॥

(ततः प्रविशत्याङ्गलमहाप्रतीहारः)

प्रतीहारः—(स्मरणमभिनीय) अहो मम राज्ञ्या विक्टोरिया चक्रवर्तिन्या महिमातिशयस्तावद्दूरे वचसाम्मनसाञ्च। तथाहि—

---

१. स्वामिन्नशरणमनपराधञ्च रक्षरक्ष माम्। भवतः भगिन्याः पुत्रेण समं चक्रवर्तिनो नगरप्रवेशविनोदानवलोकितवतो ममापराधमिममेकं सहस्व। पूर्वमेव गेयानि वशीकृतानि। २. इतइतस्स्वामी।

नाविष्णुः पृथिवीपतिर्वसुमतीमत्यल्पभूतामपि
स्वीयामाचरितुं क्षणान् कतिचिदप्याशासितुञ्चार्हति ।
सर्वां भूमिमखण्डितां बहुसमाः विक्टोरिया हस्तगा-
माधायावितवत्यसौ स भगवानेव श्रियो नायकः ॥ १ ॥

किञ्च—

कृतादिषु युगेषु यस्त्रिषु महानभूत्कश्चन
स्फुरन्वियति योगिराट् परवपुःप्रवेशादिमान् ।
न तेन च वितेनिरे महितकीर्तिविक्टोरिया-
ऽऽधिराज्यसमयाद्भुतान्यहह नक्षमाण्यूहितुम् ॥ २ ॥

अपिच—

तन्त्रीयन्त्रमहाविभूतिविभवादत्यन्तदूरस्थितान्
वृत्तान्तान् क्षणलेशतस्सविधगान् कुर्वन्नखर्वाद्भुतः ।
ऊष्मानःपदवीगतागतमहामोदेन निर्मीलवान्
पान्थानारचयंश्च राज्यसमयो विक्टोरियामण्डितः ॥ ३ ॥

( पुनश्च सानुसन्धानं ) श्रीमदलक्सान्द्राभागयेयस्य श्रीमतस्स-
प्तमैडुर्ड्चक्रवर्तिनः प्रभावातिशयोऽपि सकलप्रशस्य एव । तथाहि—

विक्टोरियाविपुलसत्कर्मसस्यफलमिष्टप्रकृष्टगुणवान्
इन्द्याजनावलिसदालीकलानिधिरमेयप्रजोपकृतिमान् ।
मात्रा समार्जितमुदारं हि राज्यमिदमाप्तस्सुनीतिचयवान्
एडुर्ड् महामहिमशाली सुदारमुतयोगी प्रतापवृणिमान् ॥ ४ ॥

मान्यान्मानितवानुदारपदवीमारूढवानन्वहं
दण्डचान्दण्डितवानखण्डमहिमा चण्डांशुतुल्यौजसा ।
ग्राह्यान् ग्राहितवान् दुराग्रहवनीसंवर्तकालानल-
स्त्याज्यांस्त्याजितवान्महान्विजयतामेङ्ङ्ङ् महीनायकः ॥ ५ ॥

( परभसं ) राजाधिराजस्य श्रीमन्मेरिदेवीदृक्कुमुदकौमुदीपूरस्य मदङ्कदेशसमनुभूतस्तनन्धयकेलेश्श्रीमतस्सकलभारतमण्डलीचक्रवर्तिनो माहाभाग्यं पितरं पितामहीश्चातिशेते । तथाहि—

पर्याप्तं सुकृतं क्षितेरनुपमं भाग्यं सदार्यावलेः
धातुस्सर्जनचातुरी किल नवा देहान्वितं सद्यशः ।
दौर्भाग्यं रिपुसंहतेर्बुधदृशां सौभाग्यसिद्धाञ्जनं
रम्या हिन्दुजनान्तरङ्गवसतिर्जार्जाख्यया राजते ॥ ६ ॥

अपिच—

कीर्तौ शीतकरो धृतौ हिमधरश्चण्डांशुरोजोभरे
गाम्भीर्ये सरितां पतिः रिपुवने वह्निः क्षमायां क्षमा ।
श्रीदः श्रीषु दयावतामचरमस्सौजन्यपात्रं महत्
दौर्जन्यस्य लवित्रमद्भुतगुणश्श्रीमेरिकान्तस्सदा ॥ ७ ॥

(साटोपं परिक्रम्य द्वारे नरपतिकुलकलकलमसहमानस्सावमानं कनकवेत्रलतामुद्यम्य ) भोभो भूपाला यथावकाशमाध्वम् । सज्जीकुरुध्वमुपायनजातम् । न वृथा सम्मर्दं सहते मम वेत्रयष्टिः ( समन्ततोऽवलो-

क्य सगर्वातिशयं) अहो तृणीकृतभुवनानां नृपाणामुद्वेलं सम्मर्दं निवारयतो मम प्रभावः । अथवाऽऽङ्गलसार्वभौमप्रतीहाराणामाजन्म समभ्यस्तमेव नृपनिवारणम् ।

(प्रविश्य पटाक्षेपेण प्रतिनिधिप्रतीहारः)

**प्रतिनिधिप्रतीहारः**—(साक्षेपं) अरे केन खल्वसमयविदा भूपतयो निवारिताः महोत्सवदिदृक्षवस्सर्वे प्रविशन्तु ।

**प्रथमः**— (सकोपं) अरे पञ्चषट्युत्तराष्टशताधिकसहस्रतमसंवत्सरजून्मासतृतीयदिने जनिमधिगतवतस्त्रिणवत्युत्तराष्टशताधिकसहस्रतमवत्सरजूलैमासषष्ठदिने टेकाधिपतिकुलजलधिकल्पलतां श्रीमेरिदेवीं परिणीतवतस्तस्यां पञ्च तनुजानेकान्तनयाञ्च काले समुत्पादितवतश्श्रीमतो जार्जचक्रवर्तिनस्तत्तदभ्युदयविशेषेष्वनर्घमणिप्राभृतपाणीनशेषभूपालमणीन्वेत्रयष्टिविनिवारितसम्मर्दान् कृतवन्तामिममांगलकुलवृद्धप्रतीहारमसमयविदमुदाहरासि ।

**द्वितीयः**—भवतु यो वा को वा भवान् । न प्रतिषेध्या मकुटाभिषेकदिदृक्षया समागता नरपतय इति चक्रवर्तिनः प्रतिनिधेश्चाज्ञा ।

**प्रथमः**—(सप्रसादं) अरे तिष्ठतु स्वजातिवैरम् । श्रीमतोश्चक्रवर्तिनोः प्रतिनिधिमद्रबंबाशासकहिन्दियामन्त्रिस्वदेशमहाराजप्रभृतिभिस्सह डिसंबरसप्तमदिने प्रातर्दशमघण्टासमये चेलिंकर्स्थानाद्दिल्ली नगरप्रवेशविनोदानाकर्णयितुमिच्छामि ।

द्वितीयः—( सानन्दं ) आकर्णयतु वृद्धांगलप्रतीहारः । श्रीमांश्चक्रवर्ती रमणीयसेनानीवेषभूषितस्सुन्दरराज्ञीवेषमण्डितया चक्रवर्तिन्या सह प्रसाधितशकटतस्समवतीर्य सपदि भार्यादुहितृसमेतेन प्रतिनिधिना सप्रणामं स्वागतवचनपुरस्सरं प्रत्युद्गतः ।

तदानीमेव प्रतिनिधिसुता चक्रवर्तिन्यै रुचिरमेकं पुष्पापीडमुपायनमदिशत् ।

ततस्तौ चक्रवर्तिनौ समन्ततस्समालोकनसमागतसकलजनजयजयघोषपरिपूरितदशदिगन्तरालमवरोहणवेदिकान्तरविनिर्मितमण्डपमलंकृत्य कञ्चित्समयं तत्र प्रतिनिधिविनिवेदितानामुत्तमाधिकारिणां प्रणामाञ्जलीन् शिरःकम्पेनानन्द्य बहिः कायमानमाग्य तत्र मकुटाभिषेककार्याध्यक्षेण यथाविभवक्रममभिधानोदीरणपुरस्सरमावेदितानां हैदराबादबरोडामहीशूरकाश्मीरासिन्धियोदयपुरादिनगराधिपतीनां नैजांप्रभृतीनां स्वदेशभूपतीनां सप्रणामाञ्जलीनि मुखान्यालोक्य तुष्यन्तौ नगरप्रवेशविनोदसज्जावभवतां ।

प्रथमः—ततस्ततः ।

द्वितीयः—

पुरः पश्चाद्वचूहं बहुविधमुपारच्य रुचिरं
विचित्रैर्वादित्रैर्मभञ्जझाङ्कारमुखरैः ।

कृपौदार्यप्रष्ठस्वगुणनिचयख्यातिपिशुनै-
रनिन्द्यैस्संश्राव्यैरतिमधुरगीतैश्च महितम् ॥ ७ ॥

विचित्रालङ्कारं विमलमृदुलक्षौमनिचुलं
स्फुरत्प्रोथं धारागमनललितं स्वर्णकविकम् ।
सहेषं सद्भद्रच्छविमणिनिगालं दृढखुरं
समारुढस्सप्तिं हरिरिव हयं जार्जनृपतिः ॥ ८ ॥

**प्रथमः**—ततस्ततः ।

**द्वितीयः**—समुद्घोषितेषु प्रवेशारम्भसूचकेष्वेकशतनलिकेषु वादितेषु राजगीतेषु ताडितेषु भेरीमृदङ्गादिषु ध्मातेषु कम्बुमुरलीकाहलीशृङ्गादिषु ।

प्रथमव्यूहगतेषु मद्रबम्बाभर्त्तृप्रमुखेषु शासकोपशासकेषु यथाक्रमं तत्तदर्हशकटीरधिरूढेषु ।

द्वितीयव्यूहगतेष्वेकविधेष्वाङ्गलतौराङ्गिकसैनिकव्यूहहिन्दियासेनापतिपरिवारेषु हिन्दियाङ्गलवान्दिमागधशृङ्गादिवादकेषु प्रतिनिधिप्रधानपरिवारेषु च सज्जेषु ।

अधितृतीयव्यूहं प्रथमतः कुटुम्बाध्यक्षतानिर्वाहकेषु चक्रवर्तिनः परिवारेषु तदनन्तरमिन्दियासेनापतिटेकाधिपत्योस्ततश्चक्रवर्तिसविधएव राजप्रतिनिधिहिन्दियामन्त्रिणोश्च तुरङ्गानारूढवत्सु । चक्रवर्तिनः पृष्ठतस्सज्जीकृतेषु शकटेषु प्रथममतिसुन्दरं श्रीमेरिचक्रवार्तिन्यां द्वितीयं प्रतिनिधिभार्यादिषु तृतीयतुरीयपञ्चमानि केषु चिदुत्तमाधिकारिषु च समारूढवत्सु । ततः पश्चान्नैजांप्रभृतिषु हैदराबादबरोडामहीशूरकाश्मी-

रराजबुधानन्तशयनगोश्रीसिन्धयापुदुक्कोटरामनाथपुरहोल्कारादिस्वदे-
शाधिपतिषु स्वस्वबिरुदसमलंकृतेषु तत्तदर्हशकटान्यधिरूढवत्सु ।

तुरीयव्यूहमिन्दियातौरङ्गिकसैनिकव्यूहेष्वलंकुर्वत्सु । तत्र तत्र वीथीगृहशालासु विविधविचित्रशकटीषु वृक्षगोपुराग्रसमुन्नतसालप्रासा-
दभूमिषु च स्थित्वा नागरेषु सकलेषु चक्रवर्तिमुखकमलसन्दर्शनसम्मो-
दमनुभवितुमत्युत्सुकेषु ।

अग्रे पश्चान्मधुरगतिभिर्वाजिनाम्मण्डलीभि-
र्गुप्तं व्यूहान्तरमधिगतश्शूरराजन्ययुक्तम् ।
कौरुक्षेत्रान्तरगतपृथासूनुसैन्यं प्रविष्ट-
श्शान्द्रींव श्रीभरतधरणीचक्रवर्ती बभासे ॥ १० ॥

**प्रथमः**—ततस्ततः ।

द्वितीयः—ततश्श्रीमानुर्वीपतिरखिलैर्व्यूहैस्समम् मन्दम्मन्दं सो-
ल्लासम्—

जम्भारिमूतिप्रभृतीनेनेकान्प्रदक्षिणीकृत्य शनैः प्रदेशान् ।
प्रत्युद्गमस्थानगकायमानमुपागमज्जोनिनदेन जुष्टम् ॥ ११ ॥

ततो वन्दिषु गीतानि गीतवत्सु शृंगिषु शृंगाणि ध्मातवत्सु स्वस्वयानादवतीर्णौ चक्रवर्तिनावयुताधिकमनुजपरिवृतां तत्कायमानमध्य-
घटितां रमणीयचीनांबरावृतां निकषा समुन्नतां वेदिमुपगतौ ।

तदा आनेरबिल् मिस्टर्जेंकिन्सः सेवाञ्जलिपुरस्सरमांगलहिन्दि-
यामहाजनविज्ञापनपत्रिकां प्रणामस्वागतदीर्घायुःप्रार्थनादिबहुविधवि-
षयमण्डितामुच्चैरतिविशदमतिद्रुतञ्च वाचयित्वा कुक्कुटाण्डोपमे मसृ-

णरुचिररजतभाजने निधाय चक्रवर्तिने समर्पयति स्म । सोऽपि तां प्रतिनिधये प्रदाय तदानीमेवातिमधुरमतिगंभीरं जम्मामसूतिगतजनैरपि श्राव्यं प्रतिवन्दनप्रजानुग्रहप्रतिज्ञादिनन्दनीयविषयं प्रत्युत्तरं व्याजीकृत्य पीयूषासारमेव सकलजनकर्णान्तरेषु वर्षति स्म ।

तदनु पूर्ववच्छृङ्गेषु धमातेषु यथापूर्वं व्यूहमुपगतौ राजदम्पती राजगीतार्कर्णनसञ्जातसन्तोषौ निजवासयोग्यमतिमनोहरं शिबिरं प्राविशताम् । प्रतिनिधिमद्रबम्बामर्त्तस्वदेशनृपा अपि सोल्लासं स्वस्वशिबिरं प्राविशन् । विनोददर्शनागतास्सर्वेऽपि क्रमात्स्वं स्वमावासं प्रातिष्ठन्त । ततःपरमेव प्रातरुपक्रान्तं विविधवादित्रवादनमपि व्यरमत् ।

प्रथमः—

अहो भाग्यं पूर्णं भरतवसुधायास्त्रिभुवन-
प्रविख्यातां कीर्तिं कुलमयति वैक्टोरियामिदम् ।
महीयांसं क्षेमं परिगलितखेदाः प्रकृतयः
प्रयाताश्श्रीजार्जप्रभुवरजनेर्नास्ति समता ॥ १२ ॥

समनन्तरवृत्तान्ता स्समवगता एव मया ।

**द्वितीयः**—वृद्धप्रतीहारः कथयतु तानाखिलान् ।

**प्रथमः**—श्रूयताम् । तस्मिन्नेव दिने चक्रवर्ती पुनरप्यास्थानमण्डपे दर्शनागतान् क्रमशः स्वदेशनृपान्नैजांप्रमुखान्कति चिदपश्यत् । डिसम्बराष्टमदिने प्रातस्तस्मिन्नेव मण्डपे पुनरनन्तशयनगोश्रीकाश्मीरसिन्धियादिस्वदेशभूपालैस्सह सम्भाषणमकरोत् । यमुनातीरे तत्र तत्र

प्रवर्त्यमानेषु मल्लमेषयुद्धनृत्यगीतवाद्यविचित्रबाणजृम्मणखड्गक्रीडाप्रभृतिविनोदेषु कांश्चिच्च समं चक्रवर्तिन्या व्यलोकयत्। रात्रौ मित्रैस्सह सजग्धिकेलिमन्वभवत्। चक्रवर्तिनी तस्मिन्दिने प्रातः स्वदर्शनायागतवतीनां स्वदेशनृपभार्याणामन्यासाञ्च भारतीयधनिकयुवतीनां स्वागतपत्रिकास्सपारितोषिकमणिमतल्लिकास्स्वीकृत्य सकलनयनानन्दनान् कुतपुमिनार् लोहस्तम्भादीनेतन्नगरगतान् दृश्यवस्तुविशेषानपश्यत्।

डिसम्बरनवमदिनेऽपि प्रातश्चक्रवर्ती सङ्घीभूय समागतैस्स्वदेशनृपैस्सह संलापविनोदमारच्य सायं समं राज्ञ्या विचित्रकन्तुकक्रीडास्तत्र तत्र विलोकयामास। तदनन्तरदिने चमूवृतौ तावधिगम्य देवतालयं पुरोधोभिरुदीरितया देवस्तुत्या श्रवणानन्दमनुबभूवतुः।

द्वितीयः—विस्मृतमन्यद्वृत्तं वृद्धप्रतीहारेण।

प्रथमः—किन्तत्।

द्वितीयः—डिसम्बराष्टमदिने डिल्लीदुर्गप्राकारजम्मामसूतिमध्यदेशं बहुदूरविस्तृतं समं चक्रवर्तिन्या प्रतिनिधिप्रभृतिभिश्च राजवेषमण्डितश्चक्रवर्ती पत्तनप्रवेशरीत्या समागत्याङ्गलभूमौ निर्मीयमाणस्य मसृणतमसितशिलामयस्य तुरगारूढावस्थस्योत्तराभिमुखन्तन्मध्यदेशे पितृज्ञप्तिचिह्नतया स्थापयिष्यमाणस्य एडुर्ड्चक्रवर्तिप्रतिरूपस्याधःपीठं श्यामलशिलारचितमेकमेकोत्तरशतनलिकनिध्वानराजापदानगीतविविधवाद्यघोषपुरस्सरं बहुविधतद्विषयवाचनप्रतिवाचनमहोत्सवकलकलजयशब्दचमत्कृतं स्थापयामास किल।

**प्रथमः**—( सस्मरणं ) अथकिमथकिम् ।

वृद्धस्य पुंसो महती किलाशा दुराग्रहश्च स्फुरति प्रभूतः ।
व्याधिस्तथाऽऽधिश्च रुषाऽप्युदग्रा स्मृतेस्तु शक्तिर्लघुतामुपैति॥

**द्वितीयः**—मकुटाभिषेकात्परतोऽप्यनुभविष्यमाणाः केचन विनोदास्संप्रत्येव विशदीकृताः ।

**प्रथ**—तानपि कथय न हि रसखण्डमुपभोक्तुमुद्वेगः ।

**द्वितीयः**—चक्रवर्त्यधिडिसंबरत्रयोदशदिनं स्वेच्छासैनिकैश्चमूभागीयेन्दियाधिकारिभिः मद्रडिल्लीमहाजनप्रातिनिध्यभाग्भिश्च काश्चित्कालमालापमारचयिष्यति। महाजनप्रतिनिधिद्वारा प्रहितानां प्रणाम. स्वागतागमनप्रार्थनायुराशासनादिविषयाणां मद्रजनविज्ञापनपत्रिकावृत्तान्तानां प्रत्युत्तरमतिरमणीयमतिगंभीरं प्रतिवन्दनाखिलप्रजारोग्यकृतज्ञताऽऽगमनानवकाशप्रकाशनादिपूर्वकं प्रतिवृत्तान्तमादेक्ष्यति !

चक्रवर्तिनी च तस्मिन्दिने डिल्लीसर्किट्प्रासादमध्यमण्डपे राज्ञीवेषमण्डिता स्थित्वा दर्शनार्थोपायनान्यमूल्यानि मणिमुखान्युपसमर्प्य स्वागतपत्रिकामनुवाच्य साञ्जलिबन्धमासीनाभिर्विजयनगरराज्ञीप्रभृतिभिर्विंशत्युत्तरशतभारतराजस्त्रीभिरालापगोष्ठीसुखमनुभविष्यति ।

**प्रथ**—ततस्ततः—

**द्वितीः**—डिसंबरचतुर्दशदिने वाहिनीदर्शनकेलिमनुभवितुं चक्रवर्तिनौ दशमघण्टासमये प्रस्थाय निजशिबिरादुभयतश्चित्रतरवेषभूषायुधपताकिकामण्डितपत्तिसैन्यसमलंकृतेन पथा सेनाविनोदप्रदेशं ग-

मिष्यतः । तदानीमेकोत्तरशतनलिकान्युद्घुष्येरन् । तत्र सन्निधापितानि पञ्चसहस्रपरिमिततौरंगिकसैन्यानि सादरमालोक्य राजपताकासमलंकृतसमुन्नतवेदिकामागत्य तत्र स्थास्यतः। तदा तानि सैन्यानि स्वस्वस्थानतः परमसुन्दरं चलित्वा द्विशतगजपदमितप्रदेशं यावत् विचित्रगतिविनोदमारच्य सेनापतिना सूचितानि सद्य एवैकदा 'चक्रवर्तिञ्जय चक्रवर्तिनि जय' इति जयघोषं करिष्यन्ति। तत्रैवाष्टवर्षदेशीयः पतिर्भरतपुरस्य स्वयमुष्ट्रमेकमारुह्य सह बहुभिरुष्ट्रारूढैरतिविचित्रविनोदन्दर्शयिष्यति । बालो योधपुरमहाराजोऽपि तुरङ्गमेकमारूढो निजतौरङ्गिकैरनेकैरास्फोटितकादितुरगपञ्चधारागतीः प्रदर्शयिष्यति । तदखिलमशेषजननयनतृप्तिकरमेव भविष्यति ।

तस्मिन्नेव दिने महास्थानमण्डपे भद्रासनमधिष्ठितवन्तं चक्रवर्तिनमशेषराजवेषमण्डितमुपगम्य मकुटाभिषेकसमर्पितगौरवचिह्नधारिणस्सर्वेऽपि प्रणामाञ्जलिमारच्य तदीयकरकमलं मधुकराइव सरोरुहमाघुम्ब्य ग्रास्यन्ति ।

**प्रथमः—**

आजिघ्रन्ति सुगन्धितैलमसृणं हस्ताम्बुजं भूपते-
स्सर्वे यन्मकुटाभिषेकसमये सञ्चुम्ब्य मन्त्र्यादयः ।
आचारः पुनराङ्गलेप्वतितमामारभ्य कालाद्बहोः
रुच्योऽयं भवतीतरत्र विषयेप्वन्याद्भुताचारवत् ॥ १४ ॥

ततस्ततः—

द्वितीयः—मकुटाभिषेकचिह्नत्वेन विनिर्णीतेषु विषयेषु 'इतः प्रभृति डिल्ली भारतसाम्राज्यार्हा प्रधाननगरी। अस्यामेव प्रतिनिधिद्वारा सर्वे साम्राज्याधिकारा निर्वर्तनीयाः इति कश्चन प्रधानविषयः किल। तदर्थमत्र निर्माप्यमानस्य प्रतिनिधिप्रमुखमहाधिकारादिनिर्वर्तनसमुचितस्य महासन्निवेशस्य परमाधारप्रस्तरप्रतिष्ठामहोत्सवाय डिसंबरपञ्चदशदिने चक्रवर्तिनौ समुचितालङ्कारौ प्रतिनिधिस्वदेशमहाराजादिभिः समं संप्रति संयोजितस्य हिन्दियाऽधिशासकशिबिरस्य साविधं गमिष्यतः। तदानीमेकोत्तरशतनलिकान्युद्घुष्येरन्। शृंगिभिः शृंगाणि ध्मायेरन्। प्रतिनिधिनाऽप्यमुं विषयमधिकृत्य सङ्ग्रहोपन्यासः क्रियेत। सिन्धियामहाराजेन चक्रवर्तिविजयचिह्नत्वेनेन्दियाप्रधानराजस्थानं डिल्ल्यां विनिमितमिति ज्ञप्तिचिह्नत्वेन च चक्रवर्तिनः प्रतिरूपशिला डिल्ल्यामत्र स्थापनीयेति विज्ञप्तिः काचिदुदीर्येत। तदनु चक्रवर्त्येकमश्मानं चक्रवर्तिन्येकञ्च वन्दिमागधगीतैर्मङ्गलवादित्रनिनादैस्समागतसकलजनजयघोषैश्च संकुलिते समये स्थापयिष्यतः।

समनन्तरदिने चक्रवर्ती डिल्लीमुत्सृज्य मृगयायै नेपालगतं व्यालमेदुरं कान्तारं प्रविश्य नेपालराजेन प्रत्युद्गत स्तत्र तत्र मृगयाक्रीडामनुभविष्यति। तस्मिन्नेव दिने चक्रवर्तिन्यप्याग्राप्रमुखदेशगतविनोदविशेषानालोकितुं प्रस्थास्यत इति।

प्रथ—भविष्यदखिलमपि संविधानमत्यद्भुतमेव मन्ये। कृतमतिविलंबजनकप्रसङ्गेन प्रधानशिबिरमध्यमध्यासीनं प्रतिनिधिना महां-

गलपुरोधोभिश्च समेतं चक्रवर्तिनमुपसर्पामि (इति परिक्रामति)

द्वितीया—अहमपि यथादिष्टमनुतिष्ठामि (इति परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टश्चक्रवर्ती प्रतिनिधिः पुरोधसश्च)

पुरो—आङ्गलवंशमुक्ताफल यथा भारतप्रथमचक्रवर्तिन्या भवतः पितामह्या यथा तातेन सुगृहीतनामधेयेन तथा भवता समावर्जितास्सकलाः प्रजा इत्यमी सत्याशिषो वयं। किञ्च—

खलैर्नीचैर्लोलैर्युवतिषु वसुस्तेयनिपुणैः
शिलाबिंबादीनां विदलनचणैः पापिभिरियम्।
वृता भारत्युर्वी तव पितृजनन्या बहुनयै-
रुपात्ता सामाद्यैर्नृपतिलक ते चापि विजिताः॥ १५॥

अपिच—

पित्रा च ते शान्तिपरेण के चित्साम्नैव नीता निजवश्यभावम्।
त्वदीयभाग्यादधुना समस्तं निर्वैरमुर्वीतलमास्ति राजन्॥ १६॥

प्रति—यदाहुः पुरोधसस्तदवितथमेव। यतः—

सूर्यसोमकुलसंभवैस्तथा मेदिनी नृपतिभिर्न शासिता।
भारतीयमखिला यथाऽऽङ्गलैरुशास्यते प्रभुभिरित्यवैम्यहम्॥ १७॥

पुरो—चक्रवर्तिन् सज्जीकृतेयम्मकुटाभिषेकसामग्री। महाङ्गलसार्वभौमक्रमाधिष्ठितं भद्रासनं भवदारोहण प्रतीक्षते। भवताऽ-

प्यनुष्ठेयानि जगदीशशासनरूपश्रुतिस्मृतिसमुदीरितकुलदेवताऽऽराधनादीनि विद्यन्ते कानि चित्कर्माणि ।

राजा—सांप्रतमास्थानमण्डपे विलोकितुमागतैः स्वदेशधरणीपतिभिस्सह कञ्चित्कालमालापगोष्ठीसुखमनुभूय त्वरितमीशशासनमनुष्ठातुमागच्छामि ।

पुरो—सदृशोऽयं स्वभावस्सकलावर्जनशीलस्य भवतः । किन्तु प्रत्यासीदति मकुटाभिषेकसमयः । तत्कृतकर्तव्येन भवता विना विलंबमागन्तव्यम् । वयमपीतः कर्तव्यशेषमनुतिष्ठामः ।

राजा—यथाऽऽदिशन्त्याङ्गलपुरोधसः ( इत्युत्थाय यथोचितं परिक्रम्य निष्क्रान्तास्सर्वे )

डिल्लीप्रवेशो नाम चतुर्थोऽङ्कः ॥

———

## पञ्चमोऽङ्कः

( ततः प्रविशति सवयस्यः श्रीराञ्जितसिंहः)

राञ्जि—( ससंभ्रमं परिक्रम्य ) भोभोस्त्वरध्वम् । कुत्र पुरोधसः किमाभिषेचनिकं विधिमनुतिष्ठन्ति । प्रत्यासन्नः पट्टाभिषेकमुहूर्तः ।

वयस्यः—सखे नवनगरपते द्वादशघण्टासमये विनिर्दिष्टो मुहूर्तः ( इत्यर्धोक्ते साशङ्कन्तिष्ठति )

राञ्जि—अवशिष्टमपि निर्भयमाचक्ष्व ।

वय—तारात्याज्यदुष्टस्ततः पुरतो वा त्याज्यतः परतो वा मुहूर्तः परिकल्प्यः इति मौहूर्तिकाः के चिदभिप्रयन्ति ।

राञ्जि—( सरोषं ) अहो विवेकाविश्रान्तमभिहितम् । अभिजित-स्सर्वदोषहरत्वमखिलेषु ज्योतिस्तन्त्रग्रन्थेषु समुदीरितमिति विश्वजनीनम् । अपिच न्यायविद्भिरस्मच्चक्रवर्तिकुलमौहूर्तिकैस्तारात्याज्यमभिजिद्व्यति-रिक्तविषयमुत्पश्याद्भिर्निर्दिश्यमानो मुहूर्तश्शुभसमृद्धिमुत्तरोत्तरं जनयती-ति निश्चयप्रचम् । तत्तिष्ठतु प्रसङ्गान्तरविचारणीयम् । प्रकृतमनुसरामः ( समन्ततस्समवलोक्य सानन्दम् )—

वेदिस्स्वर्णमयेन पीठकलशस्तोमेन पुष्पाक्षत-
व्याप्तैः काञ्चनभाजनैश्च वहति स्वर्णाद्रिसानुश्रियम् ।
आस्थानी त्रिदशोपमैर्मणिमयाकल्पोज्वलैर्भारतै-
र्द्वीप्यैर्भूपतिभिर्वरासनगतैरेषा सुधर्मोपमा ॥ १ ॥

वय—

समन्ततस्सद्युतयस्समागता नराश्च नार्यश्च विचित्रभूषणाः ।
महोत्सवप्रेक्षितये भुवं गतास्सुरास्सयोषा इति तन्वते धियम् ॥
समागतानाम्मणिभूषणाभा स्फुरन्त्यधस्ताच्च समन्ततश्च ।
तथोपरिष्टाच्च तटित्किमेषा खनिर्मणीनां विवृतान्तरा किन् ॥

अपि च—

दुकूलवैजयन्तीभिश्चलन्तीभिरितस्ततः ।
मण्डपी ह्ययतीवेयं कराग्रैरधिकारिणः ॥ ४ ॥

रञ्जि–(सविमर्शाश्चर्यं) अहो विश्वातिशायी विक्टोरियाकुलमहिमा । यतः—

पूर्णा यस्य कृपाकटाक्षलहरी दैवी सदा जृम्भते
सामाद्यैर्विविधैर्यदीयसुनयैरावर्जिता भूमिपाः ।
यस्मै भारतमण्डली स्पृहयते कालाद्बहोस्तादृशं
पश्यन्तो मकुटाभिषेचनविधिं तुष्यन्ति मेरीपतेः ॥ ५ ॥

वय—( समन्तादवलोक्य )

सुगन्धिर्भूस्तोयं विमलमनलस्याखिलशिखा
गताः प्रादक्षिण्यं सुरभिरनिलश्शीतमृदुलः ।
नभो भव्यध्वानं सकलशुभदा दैवतगणा
द्विजाः श्रेयोवाचोऽभिजिदपि शिवस्सर्वमतुलम् ॥ ६ ॥

राज्ञि–तदावामेव शीघ्रं रजतमयशकटमारुह्य महाराजचक्रवर्तिसमा-

नयनाय प्रयतावहे (इति सह वयस्येन परिक्रम्य) अपि जानासि सखे महामण्डपमद्य के के समधिगता इति ।

वय—प्रातरारभ्य नागरा वैदेशिकाश्चार्यजैनबौद्धपारसीकमाहम्मदकैस्तवा भारताङ्गला लक्षाधिकास्सह स्त्रीभिराबालवृद्धमागत्य समन्तादहमहमिकया प्रेक्षणार्हं स्थानमनुत्सृजन्तस्सन्तिष्ठन्ते। आङ्गलपुरोधसश्च समनुष्ठितसाङ्गसकलमकुटाभिषेकविधयस्समुद्धृतकनककलशास्सज्जास्स्वस्वपीठेष्वासते ।

राज्ञि—समुन्नताधिकारिषु के पुनरागताः ।

वय—दशमघण्टातःप्रभृति वङ्गमध्यमेन्दियामद्रबम्बादिषु प्रबलपदजुषस्सानुगास्सपत्नीकाश्शासकोपशासकाद्या राजकीयसभ्याः प्रतिमण्डलमतिगौरवभाजः प्राड्विवाकादयः रथगजतुरङ्गमोष्ट्राधिरूढा लक्षातीताङ्गलभारतपादातसंयुतास्सेनापतयो हैदराबादबरोडामहीशूरकाश्मीरकेरळादिस्वदेशनृपाश्च स्वस्वराजबिरुदसंयुतास्तत्तदर्हाणि मण्डपबाह्यान्तराळदेशयोस्सज्जीकृतान्यासनान्यधितिष्ठन्ति । सत्रिपाददशघण्टासमये राजबान्धवा हिन्दियामन्त्रिप्रमुखाश्च सभामण्डपमागत्य कल्पितानि तत्तदर्हासनान्यध्यासते । दशनिमेषाधिकैकादशघण्टासमये विचित्रवेषभूषितः प्रतिनिधिस्सह रमणीयमणिमयमण्डनया भार्यया तदुपकॢप्तैकत्रिंशन्नलिकध्वनिघुषितं मण्डपमागत्य तत्रत्येष्वखिलेषु समुत्थितेषु चक्रवर्तिसविधे सन्निवेशितमासनमास्थाय समुपविष्टस्सह सर्वैश्चक्रवर्तिसमागमनं प्रतीक्षते ।

राज्ञि—अपि जानासि शिबिरतः प्रस्थाय चक्रवर्तिनौ कुत्र समागच्छतः इति ।

**वय**—कथयन्तीत्थं बहिर्मण्डपाधिकृताः "चक्रवर्ती सपादैकादश-घण्टासमये विचित्रनवरत्नखचितापादलम्बितनुत्रस्सकलराजबिरुदसंयुत-स्तथाभूतया चक्रवर्तिन्या सह शिबिरतः प्रस्थाय पङ्क्तिक्रमादुभयतस्स-न्निधापितपादातेन राजमार्गेण समायाति—

असंख्यैः पादातैः करधृतविचित्रायुधवरै-
रुदस्तक्षोणीशध्वजपटपताकापरिकरैः ।
तुरङ्गारूढैश्च प्रथितबलसेनाधिपतिभि-
र्विभाति श्रीजार्जस्सह मुरचमूभिर्गुह इव ॥ ७ ॥" इति ॥

**राज्ञि**—(पुरोऽवलोक्य । सहर्षसंभ्रमं) नन्वागत एव चक्रवर्ती राजसभामण्डपसविधं । यतः—

एकोत्तरशतनलिकान्युद्घुष्यन्ते च शृङ्गमुख्यानि ।
वाद्यानि च वाद्यन्ते गीयन्ते जार्जराजगीतानि ॥ ८ ॥

(पुनरवलोक्य) अहो समुत्थितसमागतसर्वजनं प्रत्युद्गमपरव-शप्रतिनिधिप्रमुखं नीराजनहस्तपरिजनपुरन्ध्रिवर्गं मण्डपान्तरं प्रविष्ट एव महाराजः । तथाहि—

जेजेघोषप्रसितसकलं मङ्गलोक्तीड्यविप्रम्
भूपालाङ्गल्यधिगतमणिप्राभृतं वन्दिघोषैः ।
वाद्यध्वानैर्नलिकनिनदैर्गीतशब्दैरनेकै-
श्शब्दब्रह्मात्मकमिदामितश्चक्रवर्ती समेरिः ॥ ९ ॥

तदावामपि सभामण्डपं प्रविश्य प्रतिनिधिसविधएव समुचितमावेद्य नयनानन्दमनुभविष्यावः । (इति परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टश्चक्रवर्ती चक्रवर्तिनी च)

**प्रतिनिधिः**—( सविनयमग्रतो भूत्वा कराञ्चलग्रहणपुरस्सरं स्वागतमुदीर्य ) इत इतः । राज्यलक्ष्मीशुद्धान्तं प्रविशतु चक्रवर्ती ।

**राज्ञि**—( सरभसं प्रतिनिधिकर्णे 'एवं' इति विज्ञापयति)

**प्रतिनिधिः**—(उपसृत्य) नाथास्मत्कुलमौहूर्तिकवृद्धसमादेशमित्थमावेदयति रञ्जितसिंहः ।

" शुभनलिकशृङ्गगीतध्वनिरुदितस्समुपागतो मुहूर्तः ।
नृप तव पितामही च प्रथित किरीटमणिन्दधार यत्र ॥" इति॥

**परिजनः**—( विलोक्य ) कहं[1] पच्चासण्णे वि मुहुत्ते किं विलम्बिअदि समुट्ठिअणेजम्पमुहमहाराअपणामञ्जलिसन्दंसणपसरंदमुहेण चक्कवट्टिणा ।

**प्रतिनिधिः**—नायमवसरो विलम्बनमर्हति । महामण्डपएवानुगृह्यन्तामम्मी ।

**राजा** — अवहितमेव मौहूर्तिकावेदितं किन्तु न निवेद्यते पुनरनन्तरकरणीयम् ।

**पुरोधसः** (ससम्भ्रममुपसृत्य ) स्वीकृतमकुटाभिषेकसमुचितवेषौ चक्रवर्तिनौ जानकीरघूद्वहाविव मङ्गलवेदिकामारोहताम् ।

---

१. कथं प्रत्यासन्नेऽपि मुहूर्ते किं विलंब्यते समुत्थितनैजांप्रमुखमहाराजप्रणामाञ्जलिसन्दर्शनप्रसरन्मुखेन चक्रवर्तिना ।

**राजा**—तथा ( इति मेरिदेव्या सह मङ्गलवेदिकामारोहति )।

**प्रतिनिधिप्रमुखाः**—( मङ्गलवेदिं परिवार्य)—

विजयेतां विजयेतां श्रीमेरी जार्जसार्वभौमश्च ।
श्रीसीतारामाविव पाञ्चालीधर्मजाविवोदारौ ॥ ११ ॥

**परिजनः**—(विलोक्य सकौतुकं ) उदअपव्वदसिङ्गं छाहासहस्सरस्सी विअ सुवण्णगिरिकडअं शचीमहेन्दा विअ रअअसेळसिहरं पव्वईपरमेसरा विअ मङ्गलवेदिं आरूढा मेरिजज्जसव्वभोमा ।

**प्रति**—महाराज समारुह्यतां सह चक्रवर्तिन्या भद्रासनम्। अमी पुरोधसो महाभिषेकाय तीर्थसलिलपूर्णान्कनककलशान् धारयन्ति।

**राजा**—तथा भवतु (इति कुलदेवतां पितरं पितामहीञ्च सप्रणाममनुस्मरन् भद्रासने समुपविशति चक्रवर्तिनी च द्वितीये भद्रासने )

**पुरोधसः**—( परमपावनमन्त्राभिमन्त्रणपरिमलितविमलसलिलान् सुवर्णकुम्भानधिहस्तमाधाय । सादरं )—

कारुण्यौदार्यधैर्यार्जवमृदुपटुतास्थैर्यगाम्भीर्यमुख्यै-
र्वंशख्यातैरुदग्रैः प्रकृतिहितकरैस्सद्गुणानां समूहैः ।
आ सेतोरा च शैलात्तुहिनझरलसत्सानुदेशात्समस्तां
जार्ज श्रीचक्रवर्तिन् भरतवसुमतीं पालयाचन्द्रतारम् ॥ १२ ॥

---

१. उदयपर्वतशिखरं छायासहस्ररश्मी इव सुवर्णगिरिकटकं शचीमहेन्द्राविव रजतशैलशिखरं पार्वतीपरमेश्वराविव मङ्गलवेदिमारूढौ मेरिजार्जसार्वभौमौ ।

( इत्याशीर्वादसाधुवादायमानं पाणिग्रहणकौतुककृतत्वरभारत-साम्राज्यलक्ष्मीमञ्जुमञ्जीराशिञ्जितानुमोदितं सकलसद्धर्मसम्प्रतिष्ठापन-मङ्गलभेरीनिनादरुचिरं प्रतिनिधिहिन्दियामन्त्रिटेकाधिपतिनैजांप्रमुखस्व-देशमहाराजमद्रबम्बाशासकोपशासकादिप्रमोदाट्टहासबृंहितं सन्दर्शन-समागतसकलजनसाधुसाधुजयजयादिविविधसम्मदध्वनिमनोहरं आङ्गल-हैन्दवाशेषसेनाजेजेघोषपुरस्कृतं वन्दिमागधनर्तकगायकराजगीतानुकृतं मुरलीकाहलीमड्डुमद्दलझर्झरढक्काशृङ्गशंखप्रमुखविचित्रवादित्रनिनदसंघ-टितं महांगलकुलभावुकप्रस्तावनाडिण्डिमं मकुटाभिषेकमुहूर्तप्रशंसिनं कनकजयघण्डानिनादमनुसन्दधानाः सत्वरं करतलसुगन्धद्रवविलेपनमस्त कहरिद्राक्षतकुसुमारोपणपुरस्सरं श्रीजार्जचक्रवर्तिनं श्रीमेरिचक्रवर्तिनी मप्यभिषिञ्चन्ति । )

एकतो वैतालिकाः—

कल्याणोक्तिमयीं सुधां श्रवणयोस्सिञ्चाम्यहो भारताः
जातस्संप्रति मेरिजार्जनृपयो राज्याभिषेकोत्सवः ।
राजन्वत्यवनिः कृताऽखिलजनाश्शास्त्रप्रकृप्तां क्रियां
साध्वीं निर्भयमाचरन्तु कृतवत्कालेऽप्यमुष्मिन् कलौ ॥ १३ ॥

आरभ्य जेतृविलियाभिधभूमिपाला-
द्यत्रासनेऽङ्गलधरापतयोऽभिषिक्ताः ।
तत्रोज्ज्वलत्विषि परंपरयाऽऽगते श्री-
मेरीदृगुत्पलसुधानिधिरभ्यषेचि ॥ १४ ॥

अन्यतो वैतालिकाः—

आरब्धभर्तृविलियास्यनृपालपत्नी
यत्राभ्यषिच्यततरां दयितेन साकम् ।
तत्रासने विमलधाम्नि मेरिदेवी
श्रीजार्जभूपतिमणेर्दयिताऽभिषिक्ता ॥ १५ ॥

सैवर्णकुंभाञ्चिततीर्थतोयैश्श्रीजार्जभूपस्य कृतोऽभिषेकः ।
सेवासमायातसमस्तनृणामानन्दबाष्पैः कलितोऽभिषेकः ॥ १६ ॥

दक्षिणतो वैतालिकाः—

अब्देषु मासेषु दिनेषु लोकेष्वढ्योऽयमुच्चैरयमेव मासः ।
घस्रोऽयमेते मनुजा यतो यै र्यत्रायमालोकि नृपाभिषेकः॥ १७॥

नरेषु नारीषु नदीषु पूर्व्वप्यमी नरा नार्य इमा नदीश्च ।
पुरीयमुच्चैर्वयमेव वन्दिष्वयं महोऽद्य ह्यनुभूयते यैः ॥ १८ ॥

उत्तरतो वैतालिकाः—

श्रीजार्जभूपालमहाभिषेकसमुत्थितो वाद्यविशेषघोषः ।
आशंक्यते संस्तुतसत्क्रियाणां जनुर्दिनोद्यच्छुभगीतशब्दः॥ १९॥

मुञ्चत्यशेषं श्रममादिशेषः करेणुभिः क्रीडति दिग्गजौघः ।
विश्रान्तिमायाति च कूर्मराजः क्षितिं भुजे बिभ्रति जार्जभूपे ॥

पुरोधसः—आञ्जलकुलोत्तंस भारतसाम्राज्यलक्ष्मीसंवरणमालेयमवतंसीक्रियतां । (इति पट्टबन्धमखिलमकुटकटकमुद्रिकादिसंयोजनपुरस्सरमाचरन्ति ।)

सर्वे—(सप्रमोदातिशयं) प्रियन्नः प्रियन्नः ।

आङ्गलवैतालिकाः—

किरीटं विक्टोर्या गुरुभिरमलै रत्ननिकरैः
प्रकॢप्तं यद्बभ्रे भरतवसुधाभाग्यलहरी ।
पुनश्श्रीमानन्यैर्मणिभिरतुलैस्संस्कृतियुतं
धृतं मात्रा दध्रे तदनु च यदेडुर्द्नृपमणिः ॥ २१ ॥
कुलीनहीरेण सितांशुरोचिषा सुयोजितन्तन्नृपमूर्ध्नि शोभते ।
किरीटमेनं कथयद्भुवं गतं प्रजावनायेव सुधांशुशेखरम् ॥२१॥

भारतवैतालिकाः—

यदीयमणिसञ्चयाः परिलसन्त्युडुस्तोमव-
द्यदीयमणितल्लजत्रितयमर्कभौमेन्दुवत् ।
यदूढचरमद्भुताद्भुतमरीच्यलक्सान्द्रया
विभूषयति तद्भृशं मकुटमद्य मेरीशिरः ॥ २३ ॥

किञ्च—

श्रीमज्जार्जमहीपतेर्मणिगणप्रत्युप्तमेकं करे
रौक्मम्मण्डलमाविभात्यसदृशं मेर्याः करे स्वस्तिकम् ।
भातश्श्रीपतिनेत्रनीररुहयोस्सूर्यामृतांशू यथा
मेरीजार्जकराब्जयोरिति तथा कुर्वज्जनानान्धियम् ॥ २४ ॥

पुरोधसः—

लसन्करतले विभोर्मणिभिरुज्ज्वलैर्योजितः
कृपाण इति शंक्यते सति कृपाकरत्वादयम् ।

कृपागुणपदार्थकः पदविशुद्धिरप्यूहचतां
पृषोदरवलाहकप्रमुखशब्दवच्छाब्दिकैः ॥ २७ ॥

अपिच—

हीरोर्मिकाः क्षौमकरच्छदौ च सद्वृत्तमुक्तामयकंकणे च ।
भासा स्फुरन्त्या नृपरूपविष्णोः करादुदीतां कथयन्ति गङ्गाम्॥

**प्रतिनिधिः**—

नेदं तनुत्रं नवरत्नचित्रं किन्तूडुपुञ्जस्फुरिताऽभ्रलक्ष्मीः ।
अखण्डया त्वामुपगूढमुर्व्या दृष्ट्वा स्वयं श्लेषमिता नृपाल ॥

(सर्वतो विलोक्य) कस्कोऽत्र भोः । आनीयतां छत्रं चामरे च

प्रविश्य प्रतीहारः—यदाज्ञापयति प्रभुः (इति परिक्रम्य तान्युपानयति । प्रान्तवर्तिनो नरपतयोऽभ्युपेत्य तानि सादरं गृहीत्वा यथोचितमाचरन्ति)

**पुरोधसः**—(सहर्षातिशयं)—

शत्रुघ्नश्च विभीषणो रविसुतश्चान्ये च सीतायुतं
छत्राद्यैरुपचारतल्लजभरै रामं यथोपाचरन् ।
श्रीमेरीसहितं तथा नृपतयो भूपालचूडामणिं
श्रीजार्जं समुपाचरन्ति सुमहद्भाग्यं हि याज्यस्य नः ॥ २८ ॥

साम्राज्यचिह्नं परमातपत्रं फलत्फलद्रत्नमरीचि रौक्मम् ।
दधत्युपर्युर्विपतेरमुष्य दुर्दैवदृष्टीरपहन्तुमेव ॥ २९ ॥

**प्रतिनिधिः**—(सविनयमुपसृत्य) नाथ भारतमहीचक्रवर्तिन्नाखिलाः प्रकृतय स्तत्रभवन्तम्महास्थानीगतन्दिदृक्षन्ते । तदिदानीम्महास्थानीमलंकरोतु देवो देवी च ।

पुरो — आचारोऽयमाङ्गलेश्वराणा यन्महाभिषेकानन्तरं प्रजानां प्रकृष्टसन्धार्पूवकं योगक्षेमपरिपालनम् ।

**राजा** — यदावेदयन्ति धर्मविदः (इत्युत्तिष्ठति समम्मेरिदेव्या)

**आङ्गलकुलवृद्धाः**—( ससंभ्रममुत्थाय )

शचीमहेन्द्राविव देवलोकं वाणीविरिञ्चाविव सत्यलोकम् ।
उमामहेशाविव सर्वलोकं श्रीमेरिजार्जावावतां नृलोकम् ॥३०॥

(इत्युदीर्य शुभाक्षतांश्चक्रवर्तिशिरसोरारोपयन्ति)

**नृपतयः**—(सत्वरमग्रतः स्थित्वा । स्वीयान्यनर्घाणि वज्रमाणिक्यादिनवरत्नखचितानि चित्रचित्राण्याकल्पबृन्दानि करितुरगमुक्ताहारादीन्युपायनानि च विनिवेद्य शिरस्स्वञ्जलिमाबध्य ) अहो सांप्रतमास्माकी चक्षुष्मत्ता । यया खल्वीदृशमनुभूयते । यतः—

नीराजयन्ति ललनाः प्रदीपैर्जगतीपतिम् ।
गोत्रेशञ्चन्द्रवदनाः क्षपा मेरुमिवोडुभिः ॥ ३१ ॥

(सर्वे जयशब्दं कुर्वन्ति )

**वैतालिकाः**—श्रीजार्जम्मणितल्लजैरुडुनिभैर्नैजाम्नृपस्मेवतेऽप्याजानेयतुरङ्गमैर्मणिगणै राजा बरोडावनेः ।
श्रीमैसूरमहीपतिर्मणिगजैः काश्मीरराजस्तथा
श्रीमान् केरलभूपतिर्निरुपमैर्मुक्तामयैर्भूषणैः ॥ ३२ ॥
गोश्रीराजश्चयते कृतिभिर्मणिभिश्च रामवर्माऽमुम् ।
अन्ये च भूमिपालाः प्राभृतमणिभिस्समाजयन्तीशम् ॥ ३३ ॥

**प्रतिनि**—महाराज सज्जीकृतसिंहासनं सर्वतः परिष्कृतमिदं महास्थानमण्डपं सनाथीक्रियतां (इत्युदीर्य ससंभ्रममग्रतो भूत्वा) देवावित इतः।

राजा — (सोल्लासं राज्ञ्याः कराञ्चलं परिगृह्य परिवारजनैरुद्ह्यमानरत्नखचितवसनादिभिरनुगम्यमानश्छत्रचामरादिनिखिलराजोपचारैरुपचर्यमाणः करधृतकनकदण्डवज्रखचितगोलगण्डकादिनृपचिह्नस्सगौरवं परिक्रम्य महास्थान्यां सिंहासनमारोहति । राज्ञी च पुरतः प्रकॢप्तं भद्रासनमारोहति )

प्रतिनिधिः—(भार्यया सह सविधएव चक्रवर्तिनो दक्षिणतस्तिष्ठति)

हिन्दियामन्त्री—(टेकाधिपतिदेवनस्वामिनीषाप्टस्परिस्वामिनीभि स्सह वामतस्तिष्ठति )

सर्वे—( चक्रवर्तिनावुपविष्टौ प्रणम्य यथार्हमुपविशन्ति )

प्रतिनिधिः—( शृङ्गादिवादकान् पश्यति ।

शृङ्गादिवादकाः — ( महाराजश्लाघापत्रवाचकमागधागमनमावेदयन्तः स्वस्ववाद्यानि वादयित्वा विरमन्ति )

मागधाः—(तुरङ्गमानारुह्य प्रविश्य चक्रवर्तिसमक्षं तिष्ठन्ति)

प्रतिनिधिः—( शृङ्गादिवादकान् पश्यति )

शृङ्गादिवादकाः—( स्वस्ववाद्यानि काञ्चित्कालमतिमधुरं वाचयित्वा विरमन्ति ।

प्रतिनिधिः—अहो वन्दिनः पत्रिका वाच्यताम् ।

प्रधानमागधः—( चक्रवर्तिनौ सादरं प्रणम्य )

"स्वस्ति श्रीमहीमण्डलमण्डनायमानातलान्तिकमहासमुद्रमध्यवर्तिमहाद्वीपशेखरीभूताङ्गलजनपदविराजमाननौकासहस्रपरिशोभितविमलजलतिसानदीतीरप्रतिष्ठितविक्रमपुरन्दरपुरप्रभावलण्डननगरीमहाराज। अङ्गवङ्गकलिङ्गकोसलनेपालचोलकेरलाटकर्णाटचेरघूर्जरकाश्मीरसौ-

राष्ट्रमहाराष्ट्राद्यार्यदेशपरिशोभितगङ्गातुङ्गाकृष्णायमुनासरस्वतीवेगवती-
गोदावरीकावेरीप्रमुखपुण्यनदीपवित्रराम कृष्णादिविचित्रावतारास्पदब्राह्म-
णक्षत्रियादिविविधवर्णाविचेत्रित कर्मज्ञानभक्तियोगाद्यनेकाध्यात्मिकसरणि-
गतागतकेलिकुतूहलितकर्मठादिपरिपूरितभारतमण्डलीचक्रवर्तिन् । सौ-
न्दर्यसौवीर्यसौकुमार्यसौभाग्यसौलभ्यसौजन्यसौमनस्यादिपरस्सहस्रराजगु-
णैर्मनुमान्धातृदशरथभगीरथहरिश्चन्द्ररामचन्द्रप्रमुखसूर्यवंश्यचक्रवर्तिन :
ययातिशर्यातिकुरुपूरुदुष्यन्तभरतशन्तनुधर्मसूनुप्रभृतिचन्द्रवंश्यचक्रवर्ति-
नः नित्यनिरवद्यनिरतिशयवात्सल्यलावण्यौदार्याद्यपरिमेयदिव्यगुणगणां
विक्टोरियाचक्रवर्तिनीं अनवधिकशौर्यवीर्यैश्वर्यमार्दवार्जवमाधुर्यचातुर्यधै-
र्यगाम्भीर्याद्यसंख्येयकल्याणगुणगणशेवधिं श्रीमदेडुर्ड्चक्रवर्तिनमप्य-
तिशयान। अनवद्यरूपलावण्यविनिर्जितरमोमाशचीप्रभृतिसकलसुरवनिता-
सन्दोहश्रीमदलक्सान्द्रामहाराज्ञीगर्भशुक्तिमुक्ताफल । निरुपमसौन्दर्यसौ-
जन्याधिक्कृतवैदेहीपाञ्चालीदमयन्तीप्रमुखकुलपालिकाजनश्रीमेरिमहादेवी-
नयनचकोरसुधाकर। प्रख्यातपौरुषाचित्रचित्रनूतननिर्माणनिपुणाङ्गलपरम-
प्रेमभाजन।निर्व्याजराजभक्तिपरिकर्मितपरमाध्यात्मविद्यादिसुरभीकृतभार-
तनिवासिजननिवहसमाराध्यदैवत । सकलसमयसंरक्षक । सर्वतोमुख-
प्रज्ञ । सत्यसङ्कल्प । श्रीमद्भारतविषयप्रधाननगर्यां युधिष्ठिराशोकविक्र-
मार्काकुबरादिपुरातनचक्रवर्तिसमधिष्ठितचरायां यमुनाजलझरतुषारवाहि-
गन्धवाहशीतलितसकलप्रदेशायाममरावतीनिकाशायामस्यां डिल्लीपुर्यामे-
कादशोत्तरनवशताधिकसहस्रतमसंवत्सरडिसम्बरद्वादशादिने संप्रति प्रति-
निधिशासकोपशासकादिपरमाधिकारिनैजांप्रभृतिस्वदेशभूपतिभूस्वामिप्रमु-
खसकलाङ्गलभारतसमक्षं संप्राप्तभारतसाम्राज्याभिषेक । श्रीमन्महारा-

जाधिराजतुरीयातीतजार्जचक्रवर्तिन्। जयजयजयजय। भञ्जय भञ्जय शत्रून्। रञ्जय रञ्जय मित्राणि। पालय पालय धरणीम्। शीलयशीलयसतां सरणिम्। सञ्चिनु सञ्चिनु कीर्तिम। दर्शय दर्शय मूर्तिम्। कर्शय कर्शय चार्तिम्। धारय धारय सुकृतम्। कारय कारय कुशलं" (इति मङ्गलाशासनपत्रिकां वाचयित्वा विरमति।)

**प्रतिनिधिः**—अन्याऽपि पात्रिका वाच्यताम्।

**मागधः**—अहो भारताः मङ्गलसन्धापुरस्सरचक्रवर्तिशासनपत्रिका युष्मच्छ्रवणविवरेषु सुधासारमभिवर्षतु। तथाहि—

"आचारो धर्मो वा यश्च नयो वा चिरादभूद्यस्य।
स भवतु तथेति सन्धायोर्वीं जेतृविलियादयोऽप्यशिषन् ॥३४॥
पितामही चापि तथैव तातश्शशासतुर्भारतराजधानीम्।
तथाऽहमेनां परिपालयामि प्रजास्सदा सन्तु निरस्ततापाः॥३५॥
डिल्लीपुरी संप्रति भारतोर्वीसाम्राज्ययोग्या रचिता च मुख्या।
यथाऽऽङ्गलानां नृपकार्ययोग्या पुरी कृता लण्डननामधेया॥३६॥

तदद्य प्रभृति सर्वे यथास्वमतं यथाराजशासनमाखिलमनुतिष्ठन्तु सततमङ्गलजनकमशेषजनहितकरमविगीतमाचरितम्। स्वदेशभूपतयोऽपि राजादेशमनुलङ्घ्यैव यथापूर्वाचारमात्मीयप्रकृतीरनुशासतु। अधिकारिणश्च तत्तदर्हाणि मकुटाभिषेकज्ञप्तिप्रदानि राजदत्तानि बिरुदानि वहन्तु। सकलजनसुखकरणसमुद्यतदीक्षेण राज्ञा विनिर्मुक्ताः कारासक्तास्सर्वेऽपि दुष्टमाचारन्दूरीकुर्वन्तु शिष्टञ्चाचारमूरीकुर्वन्तु। यथा महान्तो रोगा न संक्राम्येयुस्तथा सर्वे शासकादयः स्वस्वदेशानां नीतिपरिष्कृतिविशेषैः परिष्कुर्वन्तु। सकलप्रजानाम्मम च मेर्यांश्च मत्सन्ततेश्च

मदाज्ञापरिपालकानां प्रतिनिधिप्रमुखानाञ्च सन्ततमारोग्यमातनोतु भगवान् सर्वेश्वरः । इति । शिवंशिवंशिवं" (इति वाचयित्वा विरमति ।)

शृङ्गादिवादकाः—(शृङ्गादिवाद्यानि वादयित्वा राजगीतान्यप्यतिमधुरमभिगीय विरमन्ति)

सर्वे—(एकोत्तरशतनलिकध्वनिमाकर्ण्य समुत्तिष्ठन्ति)

शृङ्गादिवादकाः—(स्वस्ववाद्यानि चिरं वादयित्वा विरमन्ति)

प्रतिनिधिः— अहो समागतसकलमामाजिकास्समवहिताश्शृण्वन्तु राजाधिराजमङ्गलशासनम् —

'यदुक्तं वन्दिभिस्सत्यं तत्सर्वमवधीयताम् ।
आरोग्यमस्तु सर्वेषां भारताञ्चलवासिनाम् ॥' ३७ ॥ इति ॥

शृङ्गादिवादकाः—(स्वस्ववाद्यानि वादयित्वा विरमन्ति)

मागधाः—(ससंभ्रमं स्वस्वशिरस्त्राण्यपनीय 'चक्रवर्तिन् जय चक्रवर्तिनि जय' (इति जयशब्दं मण्डपतद्बाह्यचमूसन्निवेशादिस्थलस्थितप्रतिनिधिशासकोपशासकादिस्वदेशभूपतिभूस्वामिचमूपतिप्रभृतिसकलजनजेजेघोषमहाकलकलरवेण सह त्रिवारमुच्चार्य विरमन्ति)

प्रतिनिधि—(ससन्तोषं)—

आदेशं प्रथमं समागतमुदीक्ष्यैतादृशं विस्तृतं
कार्यं कर्तुमहं यतेय कथमित्यापं किलाधीरताम् ।
दैवीं संपदमाञ्जलाधिपनृणामाशंक्य धैर्यं ततः
प्राप्य प्रावृतमायतिञ्च शुभदामालोक्य मोदे परम् ॥ ३८ ॥

(प्रविश्य) प्रतीहारः—देव समनुभूतविक्टोरियामहाराज्ञीश्रीमदेड्वर्ड्महाराजमकुटाभिषेकमहोत्सवविभवाः केचन वर्णवृद्धा द्वारदेशमध्यासते ।

**प्रतिनिधिः**—शीघ्रं प्रवेश्यन्तां ।

**प्रतीहारः**-यदाज्ञापयन्ति स्वामिनः(इति निष्क्रम्य तैस्सह पुनःप्रविशति)

(ततः प्रविशन्ति वर्णवृद्धाः)

**वर्णवृद्धाः** (सहर्षं राजानं राज्ञीं प्रतिनिधिप्रभृतीनप्यालोक्य)

मेरी सीता पृथुबल भवान् भूपते रामचन्द्रः
कैकेयीजः प्रतिनिधिरयं लक्ष्मणोऽसावमात्यः ।
शत्रुघ्नष्टेकपतिरिनतनूमुखाश्शासकाद्याः
नैजाम्मुख्या मनुजपतयो मैथिलाद्या नृपालाः ॥ ३९ ॥

श्रीराम श्शिश्तकल्पकस्सह धरापुत्र्याऽभिषिक्तो यथा
मान्यैस्त्रय्यभिमन्त्रितैस्सुरभितैस्सौवर्णकुम्भोज्झितैः ।
सम्यक्सर्वसरित्सरित्पतिजलै र्मेर्या तथा जार्जरा-
डातङ्कार्तिहृदातनोतु सततं श्रेयांसि भूयांसि नः ॥ ४० ॥

राजासाविति वेदवाक्यनिचयानाकर्ण्य सर्वे वयं
राजन् भारतसार्वभौममतुलं त्वां वीक्ष्य मन्यामहे ।
योगीन्द्रन्तव तातमेड्वृडाधिपं तन्मातरं श्रीमतीं
विक्टोर्यामपि तत्रतत्र समयेप्वेवं ह्यमन्यामहि ॥ ४१ ॥

**पुरोधसः**— राजन्नेते संविदितनादबिन्दुप्रमुखोपनिषद्रहस्याः पुराविदो यथार्हमर्हणयाऽर्हणीयाः ।

**राजा**—(सानन्दौदार्यम्)—

चक्रवर्तीति शब्दोऽयं निष्प्रतिद्वंद्वमस्तु मे ।
यथेष्टमुपभुज्यन्तां संपदस्सकलैरिमाः ॥ ४२ ॥

**सर्वे**(सप्रमोदं)सदृशोऽयं प्रसादःपरमौदार्यनिधेराङ्गलकुलतिलकस्य भवतः।

**राजा**—प्रसीदतु भगवान् सर्वेश्वरः (इति सप्रश्रयादरसत्व महामहोपाध्यायादिबिरुदावलिप्रदानपुरस्सरं हिरण्यकोटीर्विप्रसात्करोति प्रतिनिधिहिन्दियामन्त्रिटेकाधिपतिमद्रब्रम्बाशासकोपशासकादीनां नैऽ म्प्रमुखस्वदेशभूपानाञ्च तत्तदर्हबिरुदाक्षरार्पणपूर्वकं तत्तदर्हामर्हणामाच ति। सेनाजलस्थलबाष्पयानाद्यध्यक्षाणां साक्षरकनककवचबन्धनादिं रुदान्यर्पयति (प्रतिनिधिमवलोक्य) 'सर्वस्यां भारतमण्डल्यां पञ्चाश भ्स्तनरूपिकावेतनानामेतन्मासवेतनमधिकेन तत्तदर्धभागेन सह तेभ्य प्रदेयं' (इति समादिशति)

**प्रतिनिधिः**—यथादिशति चक्रवर्ती (इति सप्रणाममाज्ञामव म्रेण शिरसा प्रतिगृह्य। सादरं) श्रीमन्महाधामन् सार्वभौम श्रीमेरीदे वीनयनकुमुदसोम तत्रभवदुपासनया भारतमण्डलीपरिपूर्णभागधेयेन परं प्रसन्नः सर्वेश्वरः श्रीमतः किं भूयः प्रियमुपकरोतु।

**राजा**—(सानुसन्धानं) अस्मत्साम्राज्यधुरायामवहित ए भगवान् सर्वेश्वरः। तथापीदमस्तु।

ईशः प्रीतोऽस्तु कुर्वन्त्वनुदिनमवनीदेवताश्श्रौतकर्म
क्षोणीपालाः प्रशासत्ववनितलमिदं धर्ममार्गेण नित्यम्।
मेघा वर्षन्तु काले भवतु वसुमती सर्वदा सस्यपूर्णा
नीरोगास्सन्तु सर्वे कविकुलवचसामस्तु कोऽपि प्रसादः ॥४३

इति निष्क्रान्तास्सर्वे॥ मकुटाभिषेको नाम पञ्चमोऽङ्कः॥

**इति श्रीमता यज्वना श्वेतारण्यनारायणकविना विरचितं श्रीजार्जचक्रवर्तिमकुटाभिषेकनामनाटकं संपूर्णम्॥**



## ॥ लक्ष्मीनक्षत्रमाला ॥



विद्या या चाविद्या याऽपिच विद्याबलेन संवेद्या।
सद्गुणरत्ननिषद्या सा श्रीर्दद्याददभ्रशुभमाद्या ॥ १ ॥
वर्णकवर्णवितीर्णस्वर्णा सौवर्णवर्णसमवर्णाम् ।
तूर्णनिगीर्णप्रार्णामर्णवजां वर्णये दयापूर्णाम् ॥ २ ॥
कमलाङ्कृतवाग्गुम्भां हृतरिपुदम्भामुदग्रकुचकुम्भाम् ।
स्वीकृतहरिपरिरम्भामादृतरम्भाम्भजे शुभारम्भाम् ॥ ३ ॥
धन्यां समुद्रकन्याम्प्रतिगृहमान्याम्प्रदत्तधनधान्याम् ।
सेवे परिहृतदैन्यामहनि रजन्याम्मुरारिसौजन्याम् ॥ ४ ॥
गण्यामखिलधरण्यान्निगमवरेण्याम्मनोज्ञलावण्याम् ।
आगोपालशरण्यां सेवे गुण्यां श्रियं सकारुण्याम् ॥ ५ ॥
सत्सन्नुताभिधाना सरसविधाना सरोजदृगधीना ।
अस्तु सुखन्तन्वाना कमला नाना शुचश्च धून्वाना ॥ ६ ॥
विबुधविशेषविनुत्यां विधिसापत्यां वितीर्णसाहित्यां ।
विदधे कमलाम्मत्यां विषयविहृत्यां विभुत्वगां क्षित्याम् ॥ ७ ॥
कमलाङ्केशवलोलाङ्कृतजनजालामुदात्ततमशीलाम् ।
वन्दे वरगुणमालान्नवनवलीलामुपात्तवनमालाम् ॥ ८ ॥
वन्दे पीननितम्बां श्रियमखिलाम्बां वरोष्ठजितबिम्बाम् ।
कचनिर्जितलोलम्बां सप्रालम्बाङ्कृताच्युतालम्बाम् ॥ ९ ॥
सान्द्रकृपाझरवारां स्मेराकारां मनोहराचाराम् ।
अलिकुलनिभकचभारामनिशमुदाराम्भजेऽम्बुजागाराम् ॥ १० ॥
पापारण्यलवित्रम्पालितगोत्रम्पवित्ररुचिगात्रम् ।
वन्दे खञ्जननेत्रं विष्णुकलत्रं विचित्रचारित्रम् ॥ ११ ॥

लक्ष्मीं शिशिसदृशास्याम्भुवनाशास्यां हृतान्तरालस्याम् ।
कलितवचस्सारस्यां हरिकृतदास्यान्दधे मतावस्याम् ॥ १२ ॥
मञ्जुलचरणद्वितयाङ्कोमलसिचयाम्मनोज्ञकचनिचयाम् ।
विदलितविशेषविशयां वन्दे सदयाम्पयोनिधेस्तनयाम् ॥ १३ ॥
वन्दे मुकुन्दजायां सुन्दरकायां हृतानतापायाम् ।
अगणितगुणमणिगेयामतुलच्छायामपास्तरिपुमायाम् ॥ १४ ॥
कमलाङ्करोरुकाण्डाङ्कृतजगदण्डाञ्जनावने शौण्डाम् ।
वन्दे मनोज्ञतुण्डां विधुतवितण्डां सशार्ङ्गकोदण्डाम् ॥ १५ ॥
अद्भुतकनककलापामनतदुरापान्नमामि चिद्रूपाम् ।
नाभीनिर्जितकूपाङ्कृतभयलोपां रमाम्पिकालापाम् ॥ १६ ॥
आश्रितधवलद्वीपामादृतभूपामपास्तसन्तापाम् ।
पाटितविमताटोपाम्पावनरूपां रमाम्भजे गोपाम् ॥ १७ ॥
विधुना सोदर्यवतीं विधिना पुष्पेषुणाऽपि पुत्रवतीम् ।
अम्भोधिना पितृमतीमम्भोजदृशा नमामि भर्तृमतीम् ॥ १८ ॥
नलिनैर्नववेश्मवतीं नाकस्त्रीणाङ्गणेन दासवतीम् ।
त्रय्या स्तुतिपाठवतीं त्रैलोक्येन स्तुमः कुटुम्बवतीम् ॥ १९ ॥
कारितसर्वाभीष्टां दारितकष्टां दयारसाविष्टाम् ।
स्वरानिर्जितपरपुष्टाम्भक्त्या तुष्टाम्भजे हरेरिष्टाम् ॥ २० ॥
सुन्दरमुखारविन्दां रदजितकुन्दां रमां सदानन्दाम् ।
वन्दे वरगुणवृन्दां प्रीतमुकुन्दां दयारसामन्दाम् ॥ २१ ॥
संहृतसकलाघासां चम्पकनासाञ्चराचरावासाम् ।
वन्दे नन्दितदासां समन्दहासां रमाम्महोल्लासाम् ॥ २२ ॥

निजजनिपूतसमुद्रामवनविनिद्रामदभ्रसामुद्राम् ।
भज रुचिजितहारिद्रां श्रियमुरुभद्राङ्कुरात्तवरमुद्राम् ॥ २३ ॥
पालितविमलस्वान्ताम्मधुरदृगन्ताम्मनोज्ञसीमन्ताम् ।
नाभीजितवेशन्तां नलिननिशान्तां नमामि हरिकान्ताम् ॥२४॥
गजकरजलाभिषिक्तां नन्दितभक्तां रमां दयायुक्ताम् ।
अकृतकवचैरुक्ताम्मध्ये रिक्तां नमामि हरिसक्ताम् ॥ २५ ॥
लक्ष्मीङ्कोमलवेषां नतगुरुतोषां नमामि मृदुभाषाम् ।
लोचनजितानिमेषां सुन्दरभूषां सुपर्णरथयोषाम् ॥ २६ ॥
दासीकृतसुरवामाम्मध्ये क्षामाङ्कचालिषु श्यामाम् ।
आननजितसोमाङ्कृतनतकामां नमामि हरिरामाम् ॥ २७ ॥
लक्ष्मीतारामालाम्पठितुरबालां श्रियञ्च धारालाम् ।
स्वस्त्याम्भक्तिमलोलां वचसां विमलां रमा दिशेन्मालां ॥ २८ ॥

इति श्वेतारण्यनारायणयज्वविरचिता लक्ष्मी नक्षत्रमाला संपूर्णा ॥

---

## ॥ विक्रेयपुस्तकानि ॥




| | | रू. | अ. | पै. |
|---|---|---|---|---|
| 1. | शिवार्थालङ्कारस्तवस्सव्याख्यः . . | 0 | 8 | 0 |
| 2. | रत्नावलीनाटिका सव्याख्या . . | 0 | 12 | 0 |
| 3. | गद्यकाव्यं हरिश्चन्द्रकथादिग्रन्थसप्तक-संवलितम् . . . . | 0 | 12 | 0 |
| 4. | श्रीजार्जचक्रवर्तिमकुटाभिषेकनाटकं . | 0 | 8 | 0 |
| 5. | जगद्गुरुस्तवः . . . . | 0 | 2 | 0 |




---

## ॥ शुद्धाशुद्धपत्रिका ॥



| पृष्ठम् | पङ्क्तिः | शुद्धम् | अशुद्धम् |
|---|---|---|---|
| 2 | 7 | कमितुः | कभितुः |
| 5 | 16 | मपि | भपि |
| 6 | 3 | बद्ध | बद्ध |
| 9 | 13 | मद्ध | मद्घ |
| 10 | 2 | लव | लंव |
| 11 | 14 | नाधः | नाघः |
| 15 | 21 | श्चमा | श्चंमा |
| 17 | 11 | लद्धा | लद्घा |
| 20 | 7 | विश्य | विस्य |
| 23 | 2 | मदा | मादा |
| 30 | 8 | लब्धु | लब्धं |
| 30 | 13 | श्यतां | श्यता |
| 37 | 4 | पादद | पाद्द |
| 42 | 20 | पूर्व | षूर्व |
| 42 | | समयः | ममयः |
| 43 | 3 | खण्डि | ग्वण्डि |
| 43 | 4 | माधा | भाधा |
| 48 | 10 | ङ्गींव | न्दींव |
| 48 | 20 | दीर्घा | दीर्या |
| 54 | 15 | सोम | मोम |
| | 18 | हणं | हण |
| 61 | 18 | छाया | चाया |



KARNATA